MADRAS GOVERNMENT ORIENTAL SERIES

192

R0567

No. XIX

NYĀYASIDDHĀNTA TATTVĀMṚTAM

न्यायसिद्धान्ततत्त्वामृतम्

श्रीनिवासकृतम्

MADRAS GOVERNMENT ORIENTAL SERIES

Published under the authority of
the Government of Madras

R0567
091
SUB

General Editor:
T. CHANDRASEKHARAN, M.A., L.T.
Curator, Govt. Oriental Manuscripts Library, Madras

No. XIX

न्यायसिद्धान्ततत्त्वामृतम्

श्रीनिवासकृतम्

PRINTED AT
THE KESARI PRINTING WORKS
T'NAGAR, MADRAS.

न्यायसिद्धान्ततत्त्वामृतम्

श्रीनिवासकृतम्

Criticully edited with Introduction

BY

S. Subrahmanya Sastri, M. O. L.
Junior Lecturer in Sanskrit, University of Madras

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

Price: Rs. 2-8-0

1950

INTRODUCTION

The Government of Madras took up for consideration the question of publication of the various manuscripts in different languages on subjects like Philosophy, Medicine, Science etc., early in May 1948. Important Manuscript Libraries in the Madras Presidency were requested to send a list of unpublished manuscripts with them for favour of being considered by the Government for publication. The Honorary Secretary of the Tanjore Maharaja Serfoji's Sarasvati Mahal Library, Tanjore, alone complied with this request. This list as well as a similar list of unpublished manuscripts in the Government Oriental Manuscripts Library, Madras, were carefully examined and a tentative selection of manuscripts suitable for publication was made. The Government in their Memorandum No. 34913/48-10, Education, dated 4-4-1949 constituted an expert Committee with the Curator of the Government Oriental Manuscripts Library, Madras, as the Secretary, for the final selection of manuscripts suitable for printing and for estimating the cost of publication. The following are the members of the Committee.

1. Sri T. M. Narayanaswamy Pillai, M.A., B.L.,
2. ,, R. P. Sethu Pillai, B.A., B.L.,
3. ,, C. M. Ramachandra Chettiar, B.A., B.L.,
4. ,, R. Krishnamoorthy, (Kalki),
5. Dr. N. Venkataramanayya, M.A., Ph.D.,
6. Sri M. Ramanuja Rao Naidu, M.A. L.T.,
7. ,, V. Prabhakara Sastri,
8. ,, N. Venkata Rao, M.A.,
9. ,, H. Sesha Ayyangar,
10. ,, Masthi Venkatesa Ayyangar, M.A.,
11. ,, M. Mariappa Bhat, M.A., L.T.,
12. Dr. C. Achyuta Menon, B.A., Ph.D.,
13. ,, C. Kunhan Raja, M.A., D. Phil.,
14. ,, A. Sankaran, M.A., Ph.D., L.T.,
15. Sri P. S. Rama Sastri,
16. ,, S. K. Ramanatha Sastri,
17. Dr. M. Abdul Haq., M.A., D. Phil, (Oxon).
18. Afzul-ul-Ulama Hakim Khadar Ahamed,
19. Sri P. D. Joshi,
20. ,, S. Gopalan, B.A., B.L.,
21. ,, T. Chandrasekharan M.A., L.T.

The members of the Committee formed into Sub-Committees for the various languages, Sanskrit, Tamil, Telugu, Kannada, Malayalam, Mahrathi and Islamic Languages. They met during the month of May 1949 at Madras and at Tanjore to examine the manuscripts and make a selection. The recommendations of the Committee were accepted by the

Government in G. O. No. Mis. 2745 Education dated 31-8-1949 and they decided to call these publications as the *Madras Government Oriental Series*, and appointed the Curator, Government Oriental Manuscripts Library, Madras, as the General Editor of the publications. The following manuscripts have been taken up for publication during the current year.

"A" From the Government Oriental Manuscripts Library, Madras.

TAMIL

1. Kappal Śāttiram.
2. Anubhava Vaidya Muṟai.
3. Āttānakōlāhalam.
4. Upadēśa Kāṇḍam.
5. Cōḻan Pūrva Paṭṭayam.
6. Konga Dēśa Rājākkaḷ.
7. Śivajnāna Dīpam.
8. Sadāśiva Rūpam, with commentary.

TELUGU

1. Saṅgītaratnākaramu.
2. Auṣadha Yōgamulu.
3. Vaidya Nighaṇṭu.
4. Dhanurvidyā Vilāsamu.
5. Yōga Darśana Viṣayamu.
6. Khaḍga Lakṣaṇa Śirōmaṇi.

SANSKRIT

1. Viṣanārāyaṇīyam.
2. Bhārgava Nāḍikā.
3. Hariharacaturaṅgam.
4. Brahma Sūtra Vṛtti Mitākṣarā.
5. Nyāyasiddhānta Tattvāmṛtam.

MALAYALAM

1. Garbha Cikitsa.
2. a. Vāstulakṣaṇam.
   b. Śilpaśāstram.
   c. Śilpaviṣayam.
3. Mahāsāram.
4. Kaṇakkusāram.
5. Kriyākramam.

KANNADA

1. Lōkōpakāra.
2. Raṭṭamata.
3. Dīkṣābōdhe.
4. Aśvaśāstram.

5. a. Auṣadhagaḷu.
   b. Vaidyaviṣaya.
6. Saṅgīta Ratnākara.
7. Sūpaśāstra.

ISLAMIC LANGUAGES

1. Jamil-al-Ashya.
2. Tibb-E-Faridi.
3. Tahqiq-Al-Bubran.
4. Safinat-Al-Najat.

"B" From the Tanjore Maharaja Serfoji's Sarasvati Mahal Library, Tanjore.

TAMIL

1. Sarabhēndra Vaidya Muṛai. (Diabetes).
2. —Do— (Eyes).
3. Agastiyar 200
4. Koṅkaṇarśarakku Vaippu.
5. Tiruccitrambalakkōvaiyār, with Padavurai.
6. Kālacakram.
7. Tālasamudram.
8. Bharatanāṭya.
9. a. Pāndikela Vilāsa Nāṭakam.
   b. Purūrava Cakravarti Nāṭakam.
   c. Madana Sundara Vilāsa Nāṭakam.
   d. Percy Macqueen's Collection in the Madras University Library on Folklore.
10. Rāmayyan Ammānai.
11. Tamil Pāḍalkaḷ including Paṭṭiṇattār Veṇbā and Vaṇṇaṅkaḷ.

TELUGU

1. Kāmandakanītisāramu.
2. Tāladaśāprāṇapradīpikā.
3. a. Raghunātha Nāyaka Abhyudayamu.
   b. Rājagōpāla Vilāsamu.
4. Rāmāyaṇamu, by Kaṭṭa Varadarāju.

MAHRATHI

1. Nāṭyaśāstra Saṅgraha.
2. a. Book of Knowledge.
   b. Folk Songs.
   c. Dōrā Darūn Vēṇi Paddhati.
   d. Āśvāsa Catula Dumaṇi.
3. a. Pratāpasimhēndra Vijaya Prabandha.
   b. Śarabhēndra Tīrthāvaḷi.

c. Lāvaṇi.

4. Dēvēndra Kuṛavanji.
5. Bhakta Vilās.
6. Ślōka Baddha Rāmāyaṇa.

SANSKRIT

1. Aśvaśāstra with Tricolour illustrations.
2. Rājamṛgānka.
3. Cikitsāmṛtasāgara.
4. Āyurvedamahodadhi.
5. Gītagovinda Abhinaya.
6. a. Colacampu.
   b. Sahendra Vilāsa.
7. Dharmākūtam - Sundara Kāṇḍa.
8. Jātakasāra
9. Viṣṇutattvanirṇayavyākhyā.
10. Sangīta Darpaṇa.
11. Bījapallava.

It is hoped that the publication of most of the important manuscripts will be completed within the next four years.

Some of the manuscripts taken up for publication are represented by single copies in the Library and consequently the mistakes that are found in them could not be corrected by comparing them with other copies. The editors have, however, tried their best to suggest correct readings. The wrong readings are given in round brackets and correct readings have been suggested in square brackets. When different readings are found, they have been given in the foot notes except in the case of a few books in which the correct readings have been given in the foot note or incorporated in the text itself.

The Government of Madras have to be thanked for financing the entire scheme of publication although there is a drive for economy in all the departments. My thanks are due to the members of the Expert Committee who spared no pains in selecting the manuscripts for publication. I have also to thank the various editors, who are experts in their own field, for readily consenting to edit the manuscripts and see them through the Press. The various Presses that have co-operated in printing the manuscripts in the best manner possible also deserve my thanks for the patience exhibited by them in carrying out the corrections made in the proofs.

The present edition of the Nyāyasiddhānta-tattvāmṛtam is based upon the following manuscripts:

1. A paper manuscript in the Government Oriental Manuscripts Library bearing R. No. 43. It is 13 3/8 × 8 3/8 inches in size and consists of 61 folios having 20 lines in a page, written in Grantha script.

2. A palm-leaf manuscript in the Government Oriental Manuscripts Library 13 3/8 × 1¼ inches in size, containing 110 pages of 7 lines

to a page. The manuscript is in a much injured condition wanting a small portion in the beginning. It is in Grantha script and is described under D. No. 14257.

3. A paper manuscript $10\frac{1}{2} \times 9\frac{1}{2}$ inches in size consisting of 38 folios having 20 lines in a page. The number of the manuscript is R. No. 5311. This is a restored copy of the manuscript described under D. No. 14257 and is in good condition.

4. A palm-leaf manuscript from the Library bearing D. No. 16177. The condition of the manuscript is injured and the size is $16 \times 1\frac{1}{2}$ inches. It is preserved in this library under D. No. 16849.

Reference is to be made to the good work done by Sri V. R. Kalyanasundaram, Siromani, M. S. Vaidyanathan, Siromani, and T. H. Viswanathan, Siromani, the pandits of this library in seeing the work through the press.

Govt. Oriental Manuscripts Library, Madras 5

T. CHANDRASEKHARAN,
Curator
and
General Editor, Madras Govt. Oriental Series.

INTRODUCTION

Nyāyasiddhānta - tattvāmṛtam is a short treatise on the Vaiśeṣika School of Philosophy, expounded by Kaṇāda, Praśāstapāda, Śrīdhara and others, written by Śrīnivāsācārya. Unlike other modern works like Tarka Saṁgraha, Siddhānta Muktāvali and others which have combined both Nyāya and Vaiśeṣika Schools into one Tarka Śāstra, the present work exclusively deals with the seven categories of the Vaiśeṣika School. Even in matters dealt with in that School our author devotes much space to the ideas developed by Gaṅgeśopādhyāya, Raghunātha Śiromaṇi and Gadādhara Bhaṭṭācārya in their monumental works. Otherwise the author has followed Viśvanātha Pancānana's Siddhānta Muktāvali. Ideas which are not mentioned in the Muktāvali text but only in the commentary of Dinakara and super-commentary of Rāmarudra find prominent place here. For example Buddhi (knowledge) is said to be of three kinds, विशिष्ट, समूहालम्बन, and समुच्चय. विशिष्ट is said to be of four kinds. viz. (1) विशेष्ये विशेषणमित्यादि (2) विशिष्टस्य वैशिष्ट्यावगाहि (3) एकविशेषणविशिष्टे अपरवैशिष्ट्यावगाहि and (4) एकत्र द्वयमित्यादिविषयताशालि. विषयता (objectivity) for desire and volition is of 3 kinds, उपादानत्व, साध्यत्व and उद्देश्यत्व. These and other abstruse subjects, very well known to the readers of dialectical works of Navīna Nyāya are here dealt with in a simple style understandable to the beginners.

There are however some ideas given here which cannot be traced in the old Vaiśeṣika works.

Some of them are :—

(1) Some accept guṇas even in guṇas (p. 4) (very strange to the Vaiśeṣika School).

(2) Others do not accept ह्रस्व and दीर्घ (long and short) (p.7.).

(3) Vaiśeṣikas accept a composite conjunction चित्रसंयोग like composite colour चित्ररूप.

(4) Some do not accept two kinds of conjunctions (संयोग), (1) एकतरकर्मजन्य (born of action in either of the things (2) उभयकर्मज (born of action in both).

(5) Dharma and Adharma are व्याप्यवृत्ति (cover the whole substratum).

(6) समवाय is a category which occupies only a part of the substrate (अव्याप्यवृत्तिः).

The author sometimes differs from other Naiyāyikas. He condemns the idea that yogins could create groups of bodies and enjoy pleasure and pain in all of them simultaneously. He says that they are only legends (page 28). The authors of Muktāvali and Dinakari on the other hand uphold the traditional view (vide मुक्तावली - पृथिवीनिरूपणम्— मिथ्याज्ञानवासनाध्वंसजन्ये कायव्यूहे व्यभिचारवारणाय द्वितीयं द्रव्यपदम्).

It is noteworthy that the author has entirely left out the epistemological section of the school altogether. There is however a reference to a chapter on Pramāṇa (vide अधिकं प्रमाणग्रन्थे वक्ष्याम: p. 37) which is not found in any of the manuscripts. Perhaps the reference is to another work contemplated but not carried out by the author.

The same thing must be said of definitions. The author has not given definition to any category of the Tarka Śāstra. Readers may remember that the Naiyāyikas attach much importance to definitions and many dialectical works are intended to discuss definitions. That the author devotes a separate chapter for definitions can be inferred from the author's words' 'लक्षणग्रन्थे वक्ष्याम :'

जैमिनीयसिद्धान्तसार and लीलावतीरहस्यं are the author's two other works which he asks the readers to refer to often. But they are not available in any of the Oriental Manuscript Libraries. The work is very valuable to correctly understand the Vaiśeṣika School.

The author Śrīnivasācārya calls himself the son of Śrīnivāsācārya and grandson of 'Anantaya deśika or Anantācārya, but nothing is known about his date and birth-place. Possibly he belongs to the Tamilnad, since such names are in common usage only in South India. He invokes Śrī Nṛsimha in the opening[1] and concluding[2] verses. It is noteworthy that he identifies Śrī Nṛsimha with Triṇetra the three-eyed god Śiva in both places and thus suggests that he sees no difference between Śiva and Viṣṇu. The identity of Śiva and Viṣṇu is acceptable only to Advaitins and not Dvaitins or Viśiṣṭādvaitins. I was thinking from the outset that the author Śrīnivāsācārya could not have been an Advaitin from the epithet Ācārya, but seeing his identification of Śiva and Viṣṇu both in the beginning and at the end I am led to think that he should

---

1 दैत्येन्द्रसूनुरतिलङ्घितविघ्नजात:

2 नत्वा लक्ष्मीनृसिंहं शशिनिभवपुषं देवदेवं त्रिणेत्रम्

have been an Advaitin. His reference to Advaitins as Vedāntins[1] and Dvaitins and Viśistadvaitins as Vaiṣṇavas[2] only confirms my conviction. Though the author has to conform to the views of the logicians whose views he is expounding, yet he attaches much importance to Pūrvamīmāṁsā and Uttaramīmāṁsā. (1) 1. P. 5, 9 and 38. It is strange that an author of logic should point out śruti and Brahma Sūtra for establishing the existence of आकाश when all other logicians take up inference.

This edition of Nyāya Siddhānta Tattvāmṛtam is based on three manuscripts, one belonging to the Adyar Library and two to the Government Oriental manuscripts Library. The latter are very corrupt and incomplete, while the former is good and complete. A correct edition was possible only with the help of the Adyar manuscript. I take this opportunity to thank Prof. Kunhan Raja who procured for me the manuscript for comparison.

S. Subrahmanya Sastri.

---

1 सामान्यमनित्यमिति वेदान्तिनः P. 47.
भाट्टवेदान्तिनौ तु द्रव्यमिति वदतः p. 17.

2 जीवः परिच्छिन्नपरिमाणः सङ्कोचविकासशालीति नवीनवैष्णवमतमपास्तम् p. 26.
जीवोऽणुरिति वैष्णवमतमपास्तम् p. 26.

उपोद्घातः

विदितमेवेदं विदुषां यत् काणादपाणिनीयतन्त्रयोः सकलशास्त्रोपकारकत्वेन परमपुरुषार्थोपयोगिता । तत्रभगवान् कणभुक् स्वतपसा परितुष्टेन परमेश्वरेण उलूकरूपधारिणा उपदिष्टपरमार्थसतत्त्वः दशलक्षणात्मकं वैशेषिकं शास्त्रं रचयाम्बभूव । उक्तञ्चैतत् न्यायकन्दलीव्याख्यात्रा राजशेखरेण स्वकीयपञ्जिकायाम्—इह किल पूर्वं अजिह्मब्रह्माभ्यासदूरीकृतप्रमादाय मुनये कणादाय स्वयमीश्वरः उलूकरूपधारी प्रत्यक्षीभूय द्रव्यकर्मगुणसामान्यविशेषसमवायलक्षणं पदार्थषट्कमुपदिदेश । तस्य प्रशस्तदेवेन भाष्यं प्रणीतम् इत्यादि । एतदेवाभिप्रेत्य भगवान् प्रशस्तदेवः स्वकृतभाष्यसमाप्तौ

योगाचारविभूत्या यस्तोषयित्वा महेश्वरम् ।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः ॥

इति जगाद । अत एवैतच्छास्त्रं औलूक्यमिति प्रसिद्धम् । केचित्तु कणादस्यैव उलूक इति नामान्तरमस्ति । ततोऽस्य दर्शनस्यौलूक्यनामेति वदन्ति । विशेषसंज्ञकस्य पदार्थस्य अपूर्वतया स्वीकारादस्य वैशेषिकमिति संज्ञान्तरम् । महर्षिगौतमप्रणीतं न्यायशास्त्रं तु वैशेषिकशास्त्रात् नात्यन्तं भिद्यते । यद्यपि केचनांशाः तत्तच्छास्त्रमात्रसम्मताः इतरशास्त्रे खण्डिताश्च, यथा-उपमानशब्दयोः प्रमाणान्तरत्वं स्वीकुर्वन्ति नैयायिकाः । वैशेषिकास्तु प्रत्यक्षानुमानयोरेव प्रमाणत्वं शब्दोपमानयोः अनुमानेऽन्तर्भाव इति मन्यन्ते । नैयायिकाः विशेषाख्यं पदार्थान्तरं नाभ्युपयन्ति । तथापि न्यायसूत्रे तद्भाष्यादौ च समानतन्त्रसिद्धत्वेन वैशेषिकपदार्थानामभ्युपगमात् न शास्त्रैक्यविरोधः । अतएव वैशेषिकतन्त्रव्याख्याता न्यायलीलावतीकारः कणादसूत्रानुक्तमभावाख्यं पदार्थं अधिकतया आवपन् आह स—अभावस्य समानतन्त्रसिद्धस्याप्रतिषिद्धस्य न्यायदर्शने मानसेन्द्रियतासिद्धिवत् अत्राप्यविरोधात् अभ्युपगमसिद्धान्तसिद्धत्वादिति । वैशेषिकाभ्युपगताः पदार्थाः न्यायसूत्रोक्तषोडशपदार्थान्तर्गतप्रमेयेऽन्तर्भवन्ति इति तार्किकरक्षायां वरदराज आह । केशवमिश्रास्तु प्रमेयं द्वादशविधं गौतमेनोक्तम् । तत्र अर्थपदेनोक्तेषु वस्तुषु द्रव्यादयः सप्तपदार्था अन्तर्भवन्ति । प्रमाणादयोऽपि यद्यप्यत्रैवान्-

भवन्ति तथापि प्रयोजनवशाद्भेदेन कीर्तिता इत्यूचुस्तर्कभाषायाम् । सिद्धान्तमुक्तावली-कृतस्तु षोडशपदार्थानां गौतमोक्तानां सप्तपदार्थेषु अन्तर्भावात् सप्तैव पदार्था इति प्राहुः । सर्वथा नानयोः शास्त्रयोरत्यन्तभेद इति सिद्धम् ।

तस्यास्य शास्त्रस्य आन्वीक्षिकीति, तर्कशास्त्रमिति च नामनी प्रसिद्धे ।

धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः ।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते ।

(Ramayana 2-100)

अहमासं पण्डितको हैतुको वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् ॥

(महा. भा. शान्ति. १८०)

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥

(मनु. १२-१०६)

त्रैविद्येभ्यस्त्रयीं विद्यात् दण्डनीतिं च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः ॥

(ibid 7-43)

त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः ।
त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा ॥

(ibid 12-111)

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥

(कौटिल्यार्थशास्त्रम्-२)

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

(याज्ञ. स्मृ. १-३)

इत्यादिप्रयोगेषु तथा दर्शनात् । आन्वीक्षिकीत्यस्यार्थः प्रदर्शितो न्यायभाष्ये—— "प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणं अन्वीक्षा तया प्रवर्तत इति आन्वीक्षिकी न्यायविद्या न्यायशास्त्रम्" इति । ततश्च आत्मदर्शनसाधनस्य श्रवणस्यानन्तरभाविमननोपकारकानुमानतत्सम्बद्धार्थप्रतिपादकमिदं शास्त्रमित्युक्तं भवति । तर्कशब्दस्य तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः इति व्युत्पत्त्या द्रव्यादिपदार्थपरत्वं प्रदर्श्य पदार्थव्युत्पादकमिदं शास्त्रमित्यर्थः प्रादर्शि विदुषा अन्नम्भट्टेन ।

अनयोः शास्त्रयोः वैशेषिकतन्त्रस्य प्राचीनतां न्यायतन्त्रस्यार्वाचीनतां च वदन्ति केचित् यतः वैशेषिकतन्त्रसिद्धार्थाः न्यायतन्त्रे समानतन्त्रसिद्धत्वेन स्वीक्रियन्ते नतु विपरीतमिति । अन्ये तु तयोः समानकालिकत्वमेवाभिप्रयन्ति - तथाहि——एवमुपाख्यायते वायुपुराणे - परमशिवावतारेषु अष्टाविंशतितमात् लकुलीशात् पूर्वतमोऽवतारः सोमशर्मा नाम - तस्य अक्षपाद इति कणाद इति च द्वौ शिष्यौ अभूताम् । तौ च न्यायवैशेषिकाख्यं शास्त्रद्वयं व्यरचयताम् । इदं च शास्त्रं माहेश्वरमिति ।

अत्रेत्थं शङ्का जायेत - कथं तर्कशास्त्रस्य माहेश्वरत्वमिति । अत्रोक्तं हरिभद्रविरचितषड्दर्शनसमुच्चये-"अक्षपादमते देवः सृष्टिसंहारकृच्छिवः" - इति । तट्टीकायां गुणरत्नविरचितायां - "तेषामीश्वरो देवः सर्वज्ञः" इत्यादि । तत्रैव च वैशेषिकमतप्रस्तावे "तस्य कणादस्य मुनेः पुरः । शिवेनोलूकरूपेण मतमेतत्प्रकाशितम्" । ततः औलूक्यं प्रोच्यते । पशुपतिभक्तत्वेन पाशुपतं प्रोच्यते - इति । अतएव न्यायवार्तिकरचयिता भारद्वाजः आत्मानं पाशुपताचार्यं आवेदयति (वार्तिकसमाप्तौ) । अतएव चार्वाचीनाः वाचस्पत्युदयनप्रभृतयः न्यायग्रन्थरचयितारः ग्रन्थादौ महेश्वरमेव पूजयन्तीत्यास्तां तावत् ।

वैशेषिकशास्त्ररचयितुः नामधेयस्य निमित्तं दर्शयति गुणरत्नः—— मुनिविशेषस्य कापोतीं वृत्तिमनुष्ठितवतः रथ्यानिपतितांस्तण्डुलकणानादायादाय कृताहारस्य आहार-

निमित्तात् कणाद इति संज्ञाजनि इति । ततश्चास्य महर्षेः संज्ञान्तरमासीदिति गम्यते । अस्यैव गोत्रनिमित्तं काश्यप इति नामान्तरमप्यासीत्, यतः

यदनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥

विपरीतमतो यत्स्यादेकेन द्वितयेन वा ।
विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत् ॥

इति वदन् वैशेषिकभाष्यकारः प्रशस्तदेवः एवमभिप्रैति । अयं च प्रशस्तदेवः प्रशस्तपाद इति प्रशस्तचरण इति तथा प्रशस्तकर इति च तत्र तत्र ग्रन्थेषूल्लिख्यते । तस्य च महर्षित्वेनैव प्रथा । वैशेषिकभाष्यस्य च व्योमशिवाचार्यविरचिता व्योमवती, श्रीधराचार्यविरचिता न्यायकन्दली, उदयनाचार्यविरचिता न्यायकिरणावली, वल्लभाचार्यविरचिता लीलावतीति चतस्रो वृत्तयः समुल्लसन्ति । सूत्राणां वृत्तयः शङ्करमिश्रादिकृताः बह्व्यः सन्ति । कालविमर्शकास्तु महर्षिं कणादं क्रिस्ताब्दात्पूर्वं द्वितीयशतके निवेशयन्ति । प्रशस्तपादं च क्रिस्तोरनन्तरं पञ्चमे शतके । न्यायकन्दलीकारः 691-तमे क्रिस्तशके, किरणावलीकारश्च 851-तमे वत्सरे समभूताम् ।

न्यायशास्त्रस्य प्रणेता महर्षिर्गौतमः क इति विशेषतः निर्णेतुं पार्यते । अहल्याजानिः गौतमः श्रीरामचन्द्रचरणपांसुपवित्रितस्वजायासत्कृतः श्रूयते श्रीरामायणे । महाभारतेऽपि अयमेव गौतमः श्रूयते, परन्तु कथायां कश्चन विशेषः वर्ण्यते । इन्द्रापचारेण कुपितो मुनिः तां हन्तुं स्वपुत्रं आदिदेश । परन्तु चिरकारीति प्रसिद्धः स बालः किञ्चित्कालं विललम्बे । अत्रान्तरे प्रशान्तक्रोधो मुनिःताममर्षयदिति । महाकविभासनिर्मिते प्रतिमानाटके 'मेधातिथेर्न्यायशास्त्र'मिति श्रूयते । परन्तु स मेधातिथिः गौतम एवेति

'मेधातिथिर्महाप्राज्ञः गौतमस्तपसि स्थितः
विमृश्य तेन कालेन पत्न्याः संस्थाव्यतिक्रमम्' ॥

(शान्तिपर्व 265)

इति महाभारतवचनादवसीयते । तस्य च कालः महामहोपाध्यायसतीशचन्द्रविद्याभूषणैः क्रिस्तुजन्मनः प्राक् पञ्चमशताब्द्यामिति निर्णीतम् । द्वितीयशतकमन्ये कालविवेचका ऊरीचक्रुः । गौतमसूत्रव्याख्याता वात्स्यायनः पक्षिलस्वामीति च वार्तिकादौ प्रसिद्धः क्रिस्तशकाब्दे चतुर्थशतकेऽवर्तिष्टेति तेषामेव प्रवादः । भाष्यव्याख्याता उद्योतकरः भाष्ये दिङ्नागादिभिः बौद्धैरुद्भावितान् दोषान् चखण्ड स्वीये न्यायवार्तिके । तं च 620 तमे क्रिस्ताब्दे निवेशयन्ति । वार्तिकमपि यदा धर्मकीर्तिना दूषितमासीत् तदा षड्दर्शिनीटीकाकृत् आचार्यवाचस्पतिः स्वीयेन तात्पर्यटीकाभिधानेन व्याख्यानेन वार्तिकं समभावयत् । तस्य च टीका उदयनाचार्यविरचिता न्यायवार्तिकतात्पर्यपरिशुद्धिर्नाम विदुषां श्रवणपथं प्रविष्टा । सेयं न्यायपञ्चग्रन्थी । आचार्यवाचस्पतिमिश्रस्य कालः 850 (क्रिस्ताब्दे) इति प्रावादुकाः ।

तदिदं न्यायदर्शनमपि शैवमतत्वेनाख्यायते वैशेषिकमतवत् । तदुक्तं गुणरत्नेन—‘ परं शास्त्रेषु नैयायिकाः सदा शिवभक्तत्वात् शैवा इत्युच्यन्ते, तेन नैयायिकशासनं शैवमाख्यायते’ । इति ।

तदिदं दर्शनद्वयमेकीकृत्य भूयांसो ग्रन्थाः विरचिताः तेषु प्रधानतमः गङ्गेशोपाध्यायनिर्मितः तत्वचिन्तामणिः (A. D. 1200) तस्य परश्शतानि व्याख्यानान्युदभूवन् । तेषु प्रधानभूतं रघुनाथनिर्मितं व्याख्यानम् । चिन्तामणौ च ‘ प्रमाणतत्वमत्र विविच्यते ’ इति प्रतिज्ञाय प्रत्यक्षानुमानोपमानशब्दाख्याः चत्वारः खण्डाः केवलं प्रमाणनिरूपणेनैवोपक्षीणाः । प्रमेयजातं तु लक्षणावली, सप्तपदार्थी, तर्कभाषा, तर्ककौमुदी, तर्कसङ्ग्रहः तर्कामृतम् , भाषापरिच्छेदः, सिद्धान्तमुक्तावलिः इत्यादिषु सम्यगेव न्यरूपि अर्वाचीनैः पण्डितप्रकाण्डैः ।

तादृशग्रन्थरत्नेषु प्रधानस्थानार्होऽयमिदानीं मद्रासराजकीयप्राचीनकोशागारात् लोकोपकाराय सम्मुद्रय प्रकाश्यमानः न्यायसिद्धान्ततत्वामृताख्यो ग्रन्थः । अस्य च प्रणेता श्रीनिवासाचार्यो नाम श्रीनिवासाचार्यपुत्रः अनन्तयाचार्यनप्तेति तदीयोपोद्धातादवगम्यते ।

श्रीमान्श्रीध्रुवकाश्यपान्वयसुधावारांनिधौ चन्द्रमाः
नप्ताऽनन्तयदेशिकस्य तनयः श्रीश्रीनिवासस्य यः ।

ख्यातस्तर्कवितर्ककर्कशमहामोहान्धकारच्छिदा-
दक्षा यस्य विपक्षपक्षदृषदां टङ्कायमाना गिरः ॥

इति हि तदीयग्रन्थोपोद्धातः । तदीयग्रन्थाश्च

(1) न्यायसिद्धान्ततत्त्वामृतम्

(2) लीलावतीरहस्यम्

(3) जैमिनीयसिद्धान्तसार :—इति त्रय एव । तेषु आद्यः अयमेव । द्वितीयतृतीयौ तु अत्रैव 6 पुटे 58 पुटे च ग्रन्थकारेणानुकीर्तनादवगम्येते । न तूपलभ्येते । अत्र च ग्रन्थे दीधितिकाराणां (1547 AD) अनुकीर्तनात् ततः अर्वाचीनोऽयं भवितुमर्हति । कालविशेषनिर्णयस्तु दुश्शक एव । अस्य च ग्रन्थकारस्य शिवविष्ण्वभेदे तात्पर्यमवगम्यते । यतः आदौ

यत्पादयुग्मसरसीरुहलग्नचित्तो
दैत्येन्द्रसूनुरतिलङ्घितविघ्नजातः ।
जातस्तमिन्दुधवलं वरदं भुजाभ्यां
देवं त्रिनेत्रममृतं सततं भजामः ॥

अन्ते च

नत्वा लक्ष्मीनृसिंहं शशिनिभवपुषं देवदेवं त्रिनेत्रं
कृत्वा नानाविधानां बहुकृतिनिचयं कल्पनानां शुभानाम् ।

इत्यत्र विष्ण्ववतारभूतस्य श्रीनृसिंहस्य त्रिणेत्रशिवाभेदं वर्णयति । तत एव चास्य अद्वैतश्रद्धाप्यनुमीयते ।

न्यायसिद्धान्ततत्त्वामृतम् ।

अयं च ग्रन्थः मुक्तावल्यादिवत् न्यायवैशेषिकतन्त्रयोः सारसङ्ग्रहरूप एव । परन्तु अत्र वैशेषिकाभिमतानां पदार्थानामेव प्रायः निरूपणं दृश्यते । न्यायाभिमतस्तु प्रमाणचतुष्टयवादः अत्र स्पष्टं लिख्यते, (P. 38) न तु तेषां निरूपणमत्रोपलभ्यते ।

केवलं द्रव्यादयः सप्त पदार्थाः निरूपिताः । तत्रापि पदार्थानां लक्षणानि नानुक्रान्तानि, परन्तु "लक्षणग्रन्थे वक्ष्यामः" "अधिकं प्रमाणग्रन्थे वक्ष्यामः" (Page 37) इत्यादिवचनात् लक्षणप्रमाणे अन्यत्र निरूपिते इत्यध्यवस्यामः ।

अत्र च केचन विषयाः अपूर्वतया लिखिताः इतरतर्कग्रन्थेष्वनुपलभ्यमानाः ।

तथाहि—गुणेऽपि केचन गुणमङ्गीकुर्वन्ति (P. 4)

ह्रस्वदीर्घयोर्मानाभाव इति केषाञ्चिन्मतम् (P. 7)

एकतरकर्मजात् उभयकर्मजश्च संयोगः विजातीय इत्येतन्न । एकविधावेव तौ इति नव्याः ।

अवयवपरंपरायाः त्रुटावेव विश्राम इति नव्यवेदान्तिनः । वैशेषिकास्तु चित्रमेव संयोगं स्वीकुर्वन्ति ।

धर्माधर्मादयः व्याप्यवृत्तिगुणाः ।

कायव्यूहे मानाभावः । न च सौभर्यादौ तथा श्रवणात् पुराणं प्रमाणमिति वाच्यम् । तथाविधगाथायां श्रद्धामात्रेण तथात्वाभिधानात् । अन्यथा भूमिकाधरकल्पित-गाथानामपि तथात्वापातात् । इति

अत्र सर्वत्र मुक्तावलीकृतामन्येषां च तार्किकाणां अभिप्रायो भिन्न एव ।

किञ्च ब्रह्ममीमांसायां आकाशाधिकरणप्रामाण्यात् अयं आकाशमभ्युपगच्छति । तथाभ्युपगच्छंश्च ब्रह्ममीमांसायाः प्रामाण्यं मन्यते । न च तार्किकाभिमानी वेदान्त-सूत्राणां प्रामाण्यं मन्येत, अपरिग्रहाच्चात्यन्तमनपेक्षेति ब्रह्मसूत्रेण न्यायशास्त्रस्य अनपेक्षित-त्वोपपादनात् । परन्तु अयं पूर्वोत्तरमीमांसयोः श्रद्धानः स्वाभिमतं प्रमाणमुदभावयदिति चिन्तनीयम् ।

अयमन्यो विशेषोऽस्य ग्रन्थस्य, यदत्र प्राच्यैः गदाधरादिभिः सूक्ष्मतया वादग्रन्थेषु निर्दिष्टा विषयाः सरलशैल्या निर्दिश्यन्ते । यथा ज्ञानप्रभेदाः अभावप्रभेदा इत्यादयः ।

सर्वथायं ग्रन्थः अनधीततर्कशास्त्राणां सरलशैल्या विषयप्रतिपादकः। अधीततर्काणां च अपूर्वविषयबोधक इति एतद्ग्रन्थस्य महान् प्रयोजनलाभः।

मातृका

राजकीयप्राच्यपुस्तकभाण्डागारस्थतालपत्रेभ्यः समुद्धृतं हस्तलिखितं पुस्तकमेवास्य मुद्रापणे मूलम्। तस्यासमग्रत्वेन पूर्णतां संपादयितुं अडयार् ग्रन्थालयस्थं आन्ध्रलिप्यात्मकं तालपत्रमुपायुज्यत। तदत्र प्रमादागताः अशुद्धीः स्वयमेव संशोध्य ग्रन्थरसमनुभवन्तु विद्वांसः। शुद्धाशुद्धिपत्रिका न दीयते स सम्प्रदायः विदुपामज्ञतामापादयन्निव इदानीं लुप्तप्रायो दृश्यते। 28 पुटे 'भूमिकाधारकल्पनाभागानामपि' इत्येतत् 'भूमिकाधरकल्पितगाथानामपि'—इति पठनीयम् दुरूहत्वात्स्मार्यते।

विदुपामनुचरः,

S. सुब्रह्मण्यशास्त्री।

विषयसूचिका

मङ्गलाचरणम्	१
जातिरुपाधिश्चेति द्विविधं सामान्यमिति नव्यमतम्	२
कारणत्वादीनां सप्तमभावपदार्थत्वमिति दीधितिकारमतम्	२
पृथिवीविभागः	२
घ्राणस्य पार्थिवत्वव्यवस्थापनम्	३
सङ्ख्यानिरूपणम्	३
सङ्ख्यासामान्यस्य नित्यत्वमिति मीमांसकमतम्	४
एकत्वमेव सङ्ख्या, न तु द्वित्वादि, व्यवहारस्यापेक्षाबुद्धिविषयकत्वेनोपपत्तेरिति उत्तानमतम्	४
बहुत्वमतिरिक्तसङ्ख्येति केषाञ्चिन्मतम्	५
तत्खण्डनम्	५
परिमाणप्रभेदाः	५
परमाणुसद्भावे पूर्वः पक्षः	५
तत्र सिद्धान्तः	६
परिमाणेषु कारणकथनम्	७
ह्रस्वदीर्घयोर्मानाभाव इति केषाञ्चिन्मतम्	७
महत्त्वमेकमेव परिमाणमिति दीधितिकारमतम्	७
पृथक्त्वनिरूपणम्	७
पृथक्त्वे मानाभाव इति दीधितिकारमतम्	७
तत्खण्डनम्	८
संयोगनिरूपणम्	८
चित्रसंयोगाङ्गीकर्तृवैशेषिकमतम्	८
क्रियाजन्यसंयोगविभागौ एकविधावेवेति नव्यमतम्	८
विभागनिरूपणम्	८
विभागे पूर्वपक्षः	८, ९
विभागस्यावश्यकत्वसिद्धान्तः	९

परत्वापरत्वनिरूपणम् ९
परत्वापरत्वयोः पूर्वपक्षः ९
तत्र सिद्धान्तः १०
पृथिवीविभागः १०
सावयवपृथिव्यां मानाभव इति बौद्धमतम १०
तत्खण्डनम् ११
वेदान्तिनामर्धजरतीयमतनिराकरणम् ११
त्रुटिपुञ्ज एव घटादीति नवीनवेदान्तिमतम् ११
तत्खण्डनम् ११
जलनिरूपणम् १२
रसनस्य जलीयत्वव्यवस्थापनम् १२
जले माधुर्यसत्वे प्रमाणकथनम् १२
तत्र पूर्वपक्षः १३
तत्र सिद्धान्तः १३
तेजोनिरूपणम् १४
चक्षुषस्तैजसत्वव्यवस्थापनम् १४
गोळकातिरिक्तेन्द्रियसाधनम् १४
सुवर्णस्य तैजसत्वव्यवस्थापनम् १५
वह्नेश्चातुर्विध्यकथनम् १४
उद्भूतरूपस्पर्शादिभेदेन तेजश्चातुर्विध्यम् १५
वायुनिरूपणम् १६
वायोरतिरिक्तद्रव्यत्वे पूर्वपक्षः १६
तत्रैव सिद्धान्तः १६
वायोःत्वगिन्द्रियजन्यपत्यक्षविषयत्वमिति मीमांसकमतनिरूपणम् १७
वायौ गन्धोऽस्तीति पूर्वपक्षः १७
तन्निराकरणम् १८
चर्मातिरिक्तत्वगिन्द्रियसद्भावे पूर्वपक्षः १८
तत्रैव सिद्धान्तः १८
आकाशनिरूपणम् १९

आकाशगुणाः	१९
शब्दो नित्य इति मतकथनम्	१९
शब्दस्य द्रव्यत्ववादिमतम्	१९
ईश्वरातिरिक्ताकाशो नास्तीति पूर्वः पक्षः	१९
ईश्वरातिरिक्ताकाशसद्भावे प्रमाणम्	२०
आकाशनित्यत्वकथनम्	२०
आकाशोऽनित्य इति वेदान्तिमतनिरूपणम्	२०
श्रोत्रेन्द्रियं नाकाशः अपि तु द्रव्यान्तरमिति पूर्वपक्षः	२०
कॢप्तेनैवाकाशेनोपपत्तिरिति सिद्धान्तः	२१
भेर्यादीनामेव शब्दाश्रयत्वमस्त्विति पूर्वपक्षः	२१
तत्समाधानम्	२२
शब्दप्रभेदाः	२२
दिक्कालनिरूपणम्	२३
दिक्कालयोर्मानाभावः, प्राच्यादिव्यवहाराणामुपाधिभिरेवोपपत्तेरिति दीधितिकारमतम्	२३
आत्मनिरूपणम्	२४
जीवेश्वरभेदेन तद्द्वैविध्यम्	२४
शरीरमेवात्मेति चार्वाकमतम्	२४
चार्वाकमतखण्डनम्	२५
इन्द्रियमेवात्मेति मतोपपादनम्	२५
इन्द्रियात्मवादखण्डनम्	२५
प्राणात्मवादोपक्रमः	२५
प्राणात्मवादनिराकरणम्	२६
मनआत्मवादिमतोपपादनखण्डने	२६
जीवाणुत्ववादिवैष्णवमतनिराकरणम्	२६
परिच्छिन्नपरिमाणवान् सङ्कोचविकासशील इति नवीनवैष्णवमतम्	२६
जीवगुणाः	२६
ईश्वरनिरूपणम्	२६
ईश्वराक्षेपः	२७

ईश्वराभावे युक्तयः २७
ईश्वरव्यवस्थापनम् २८
ईश्वरसाधने दीधितिकारोक्तयुक्तयः २९
मनोनिरूपणम् ३०
मनस आक्षेपः ३०
मनस्सद्भावे युक्तयः ३०
मनसः अणुत्वसाधनम् ३०
तस्य विभुत्वनिराकृतिः ३०
मनसः मध्यमपरिमाणवादिमतखण्डनम् ३१
मनोगुणाः ३१
गुणानां साधर्म्यकथनम् ३१
चित्ररूपसाधनम् ३१
चित्ररूपे मानाभाव इति दीधितिकारमतम् ३२
तत्खण्डनं चित्ररूपव्यवस्थापनञ्च ३२
गन्धरसयोः न चित्रत्वमिति सयुक्तिकमुपपादनम् ३३
चित्रस्पर्शाङ्गीकारे युक्तयः ३४
गुरुत्वस्यावश्यकत्वनिरूपणम् ३४
शब्दनिरूपणम् ३४
शब्दभेदाः ३४
शब्दो द्रव्यमिति भट्टाचार्यमतम् ३५
तन्निराकरणम् ३५
शब्दस्य क्षणिकत्वसाधनम् ३५
शब्दनित्यत्ववादिमीमांसकमतम् ३५
उक्तमीमांसकमतनिराकरणम् ३६
तत्र युक्तयः ३६
बुद्धिप्रभेदाः ३६
सविकल्पकस्य त्रैविध्यम् ३६
विशिष्टवैशिष्ट्यज्ञानस्य चातुर्विध्यकथनम् ३७

एकविशेषणविशिष्टे अपरविशेषणवैशिष्ट्यज्ञाने विशेष्यतावच्छेदक-
निर्णयस्य कारणत्वम् ३८
वाजपेयाधिकरणदृष्टान्तेन उद्देश्यतावच्छेदकविधेययोः समानकालीनत्वभाननिरूपणम् ३८
निर्विकल्पकनिरूपणम् ३९
अनुभूतेश्चातुर्विध्यकथनम् ३९
भ्रमसंशयानङ्गीकर्तृप्रभाकरमतखण्डनम् ३९
इच्छानिरूपणम् ४०
प्रयत्नविभागः ४०
जीवनयोनियत्ने पूर्वपक्षसिद्धान्तौ ४०
बुद्ध्यादीनां क्षणिकत्वनिरूपणम् ४१
धर्माधर्मयोर्बहुविधत्वम् ४१
संस्कारत्रैविध्यकथनम् ४१
भावनायाः निश्चयजन्यत्वं स्मृतिजनकत्वं च ४१
धर्माधर्मभावनानामाक्षेपः ४१
देवताप्रीतेः द्वारत्वनिराकरणम् ४२
यागादेः फलकालपर्यन्तस्थायित्वनिराकरणम् ४२
निर्व्यापारस्यैव यागादेः कारणत्ववादिमतखण्डनम् ४२
यागध्वंसस्यैव व्यापारत्वोपपादनं तत्खण्डनञ्च ४३
अपूर्वाङ्गीकारे मीमांसकोक्तयुक्तयः ४४
तत्रैव प्रभाकरोक्तयुक्तयः ४४
एवं भावनाया असिद्धिरिति दीधितिकारमतम् ४४
ज्ञानस्यैव सविषयत्वं नेच्छादीनामिति मतखण्डनम् ४५
इच्छाकृत्योः विषयतात्रैविध्यनिरूपणम् ४५
कर्मनिरूपणम् ४६
तस्योत्सर्गतः चतुःक्षणावस्थायिता ४६
तदपवादः ४६
सामान्ये प्रमाणकथनम् ४७
सामान्ये मानाभाव इति चार्वाकमतम् ४७

तत्खण्डनं च ४७
सामान्यमनित्यमिति वेदान्तिमतम् ४७
विशेषनिरूपणम् ४७
समवायः तत्र प्रमाणम् ४७
समवाये मानाभाव इति भट्टाचार्यमतोपपादनम् ४८
समवायस्थापनम् ४८
सांप्रदायिकमतेन समवायस्य सद्भावः, अभावनिरूपणम् ४९
प्रतियोगित्वस्वरूपविचारः ४९
अभावाभावत्वं प्रतियोगित्वमिति आचार्यमतोपपादनम् ४९
मणिकृद्भिः तत्खण्डनपूर्वकं स्वरूपसम्बन्ध इति स्वमतस्थापनम् ५०
विरोधित्वमेव प्रतियोगित्वमिति केषांचिन्मतम् ५०
प्रतियोगित्वमखण्डोपाधिरिति दीधितिकारमतम् ५०
प्रतियोगितावच्छेदकत्वस्वरूपविचारः ५१
विशेषाभावातिरिक्तसामान्याभावे प्रमाणकथनम् ५२
तत्र मणिकृतामाशयः ५२
तत्र दीधितिकृतामाशयः ५२
तत्रैव नवीनानामभिप्रायः ५२
विशिष्टाभावे मानाभाव इति केषांचिन्मतम् ५३
विशेषणविशेष्यसम्बन्धाभाव एव विशिष्टाभावो नातिरिक्त इति मणिकार मतम् ५३
विशिष्टाभावो नातिरिक्त इति मिश्रप्रभृतीनां मतम् ५३
उभयाभावे मानाभावकथनम् ५३
प्रत्येकाधिकरणे उभयाभावसत्वोपपादनम् ५४
घटपटोभयं न पटं इति प्रतीत्या व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताका- भावाभ्युपगन्तृमतनिरूपणम् । पटवति घटत्वेन पटो नास्तीति प्रतीत्या व्यधिकरणधर्मावच्छिन्नाभाववादिसौन्दलमतनिरूपणञ्च ५५
अत्यन्ताभावस्य व्याप्याव्याप्यवृत्तित्वेन द्वैविध्यम् ५५
संयोगाभावो नाव्याप्यवृत्तिः संयोगस्य व्याप्यवृत्तित्वादिति लीलावतीकारमतम् ५५
संयोगेन द्रव्यस्याव्याप्यवृत्तित्वमिति दीधितिकारमतम् ५५

समवायोऽप्यव्याप्यवृत्तिरिति नवीनमतम् ५६
धर्मात्यन्ताभावो धर्म्यत्यन्ताभावश्च एक एवेति यज्ञपतिमतम् ५६
समनियताभावानामैक्यमिति दीधितिकारमतम् ५६
अधिकरणमेवाभाव इति प्राभाकरमतम् ५६
उक्तप्राभाकरमतनिरासः ५६
सप्रतियोगिकः अनुगतो धर्मः अभावत्वम् ५७
स च प्रतियोगितावच्छेदकरूप इति स्वमतम् ५७
तार्किकम्मन्यानां मतोपपादनं तन्निराकरणञ्च ५७
अभावत्वस्वरूपविचारः ५७
सत्वावच्छिन्नप्रतियोगितानिरूपितानुयोगित्वमभावत्वमिति स्वमतवर्णनम् ५७
अत्यन्ताभावप्रतियोगितायाः सम्बन्धावच्छिन्नत्वे प्रमाणकथनम् ५८
संसर्गाभावान्योन्याभावयोः स्वरूपभेदोपपादनम् ५९
भेदपदार्थ एवालीक इति नृसिंहाश्रममतनिरासः ६०
ध्वंसप्रागभावलक्षणकथनम् ६०
सामयिकाभावं स्वीकुर्वतां वेदान्तिनामाशयः ६०
तन्निराकरणम् ६१
प्रागभावादीनां विशेषलक्षणानि ६१
उपसंहारः ६२

Abbreviations.

A. Adyar Library Manuscript.
B. Govt. Oriental Manuscripts Library manuscript.

॥ श्रीः ॥

न्यायसिद्धान्ततत्त्वामृतम्

यत्पादयुग्मसरसीरुहलग्नचित्तो
दैत्येन्द्रसूनुरतिलङ्घितविघ्नजातः ।
जातस्तमिन्दुधवळं वरदं भुजाभ्यां
देवं त्रिणेत्रममृतं सततं भजामः ॥

श्रीमान् त्रैभुवकाश्यपान्वयसुधावाराम्निधौ चन्द्रमाः
नप्ताऽनन्तयदेशिकस्य तनयः श्रीश्रीनिवासस्य यः ।
ख्यातस्तर्कवितर्ककर्कशमहागोहान्धकारच्छिदा-
दक्षा यस्य विपक्षपक्षदृषदा टङ्का[यमाना] गिरः ॥

सिद्धान्ताक्षेपलेखाऽसुरपरिमृदितालोचनाहीशबद्ध-
प्रज्ञामन्थाचलेन्द्रप्रमथनजनितादभ्रसंक्षोभभाजः ।
तर्कांकूपारमध्यादमृतमुदहरन्न्यायसिद्धान्ततत्त्वं
श्रीश्रीनिवासो विबुधगणमुदे तार्किकाणां वरिष्ठः ॥

पदार्थो द्विविधः । भावोऽभावश्चेति । भावः षड्विधः । द्रव्यगुणकर्म-सामान्यविशेषसमवायभेदात् । तत्र द्रव्यं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्म-मनोभेदान्नवविधमेव । गुणाः चतुर्विंशतिप्रकाराः । रूपरसगन्धस्पर्शसङ्ख्यापरि-माणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेष-

प्रयत्नधर्माऽधर्मसंस्कारभेदात् । कर्म पञ्चविधम् उत्क्षेपणावक्षेपणाकुञ्चन-प्रसारणगमनभेदात् । सामान्यं द्विविधम् । परम् अपरं च । परं सर्वसामान्य-व्यापकम् ।

तच्च सत्तारूपम् । अपरं च द्विविधम् । एकं सर्वसामान्यव्याप्यं तच्च चैत्रत्वादि, अन्यच्च यत्किञ्चित्सामान्यव्यापकत्वेसति यत्किञ्चित्सामान्यव्याप्यम् । तच्च द्रव्यत्वगुणत्वकर्मत्वपृथिवीत्वरूपत्वोत्क्षेपणत्वादिकम् । नव्यास्तु[1] सामान्यं द्विविधम् । जातिरुपाधिश्चेति विभजन्ति । तत्र सिद्धान्तविरोधं युक्तिविरोधं च लक्षणग्रन्थे वक्ष्यामः ।

दीधितिकृतस्तु केचनोपाधयः कारणत्वादयः सप्तमभावपदार्था इति वदन्ति । विशेषो नित्यः नित्यद्रव्यमात्रवृत्तिरनन्तश्च । समवायश्च नित्यात्मकः । सोऽपि नानेति दीधितिकृतः । अभावश्च द्विविधः संसर्गाभावोऽन्योन्याभावश्चेति । संसर्गाभावश्च त्रिविधः । प्रागभावप्रध्वंसाभावात्यन्ताभावभेदात् ।

सा च पृथिवी द्विविधा । नित्यानित्यभेदात् । नित्या परमाणुरूपा । अनित्यापि द्विरूपा द्व्यणुकमहद्भेदात् । सा च घ्राणेन्द्रियशरीरमृत्पाषाणसिकतादिरूपा । तत्र घ्राणेन्द्रियमतीन्द्रियम् अनुद्भूतगुणवत्त्वात् चक्षुर्वत् । [2]यद्वा घ्राणेन्द्रियमऽचाक्षुषम् अनुद्भूतरूपत्वात तप्ततैलस्थवह्निवत् । एवं तदस्पार्शनम् अनुद्भूतस्पर्शत्वात् प्रदीपप्रभावत् बाष्पवच्च । एवं तदमानसम् [3]बहिर्द्रव्यत्वात् घटवदिति । एवञ्च रसनादीनां द्रव्याग्राहकत्वात् अर्थादतीन्द्रियत्वं सिद्धम् । तच्च नासाग्रवर्ति । गन्धोपलब्धिसाधनम् । तदपि पार्थिवं [4]रूपादिषु पञ्चसु मध्ये गन्धाभिव्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवदित्यनुमानेन तस्य पार्थिवत्वसिद्धिः ।

1 उत्तानास्तु ।

भर्जनकपालस्थवह्नौ अनुद्भूतरूपवति त्वग्ग्राह्ये व्यभिचारादाह-यद्वेति । घटे व्यभिचारवारणाय अनुद्भूतेति ।

3 आत्मान्यद्रव्यत्वादित्यर्थः । तेनात्मनि न व्यभिचारः ।

4 अत्रहेतुत्रयेतात्पर्यम् । शब्दाव्यञ्जकत्वेसति गन्धव्यञ्जकत्वस्य नवशरावगन्धव्यञ्जकजलेऽव्यभिचारात् ।

अथ नवशरावगन्धाभिव्यञ्जकसलिले व्यभिचारः । न च तस्य गन्धस्यैवेत्येवकारेण गन्धभिन्नानभिव्यञ्जकत्वे सति गन्धाभिव्यञ्जकत्वादिति हेतुर्लभ्यते । तथा च तादृशसलिलस्य स्वरूपाभिव्यञ्जकत्वेन हेतोरेवाभावान्न-व्यभिचार इति वाच्यम् । घ्राणस्यापि गन्धभिन्नगन्धत्वाभिव्यञ्जकत्वेन सत्यन्तस्य विशेषणस्याभावेन विशिष्टहेतोः पक्षावृत्तित्वेन स्वरूपासिध्यापातात् । नच रूपानभिव्यञ्जकत्वे सति गन्धाभिव्यञ्जकत्वादिति हेतुः ; अतो न स्वरूपासिद्धिः न व्यभिचार इति वाच्यम्, दृष्टान्ताऽसिद्धिप्रसङ्गात् । अत एवासाधारणाभिव्यञ्जकत्वमपि निरस्तम् । अत एव गन्धसामान्याभिव्यञ्जकत्व-मपि निरस्तम्, असाधारणत्वस्य दुर्वचत्वादिति चेत ।

मैवं, तादृशसलिलस्य नवशरावगन्धोत्पादकत्वस्वीकारात्, तादृश-गन्धाभिभावकमालिन्यापसरणमात्रोपक्षीणतया गन्धाभिव्यञ्जकत्वे मानाभावात् व्यभिचाराभावात् । परसमवेतरूपानभिव्यञ्जकत्वे सति गन्धाभिव्यन्जकत्वादिति विशेषणाच्च न दृष्टान्ताऽसिद्धिरिति सर्वं रमणीयम् ।

तच्च न द्रव्यग्राहकम् । शरीरं च नरपशुवृक्षगुल्मलतादिभेदेन बहुविधम् । सा च पृथिवी रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोग-विभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती । तत्र रूपादिचतुष्टयं पाकजरूपादि-जभेदेन द्विविधम् । तदपि तरतमादिभेदेन बहुविधम् । द्विविधमपि रूपं नीलपीतचित्रादिभेदेन बहुविधम् । स्पर्शोऽपि कठिनकोमलविचित्रादिभेदेन अनेकप्रकारः । गन्धः सुरभ्यसुरभिभेदेन द्विरूपः । सोऽपि तरतमादिभेदेन अनेकप्रकारः । चित्रस्तु नास्त्येव गन्धो मानाभावात् । रसोऽपि लवणतिक्त-कटुकषायाम्लमधुरभेदेन षड्विधः । सोऽपि तरतमादिभेदेन बहुप्रकारः । रसोऽपि चित्रो नास्त्येव । मानाभावादेव । रूपस्पर्शावपि चित्रौ न स्तः इति दीधितिकृतः । एतच्चाग्रे विवेचयिष्यते । स्पर्शोऽपि तत्रानुष्णाशीतः । तत्ररूपादिचतुष्टयमनित्यमेव ।

सङ्ख्या च एकत्वादिपरार्धपर्यन्ता । द्वित्वादिपरार्धपर्यन्ता सङ्ख्य-अनित्यैव । द्वित्वादीनामपेक्षाबुद्धिजन्यत्वनियमात् । जन्यभावस्य विनाशित्वा

नियमाच्च । अपेक्षाबुद्धिः नानैकत्वावगाहिनी बुद्धिः । तन्नाशश्च द्वित्वादिनाशकः । प्रथममयमेकोऽयमेक इत्यपेक्षाबुद्धिः, ततश्च द्वित्वोत्पत्तिः, ततश्च द्वित्वनिर्विकल्पकम्, ततश्च इमौ द्वित्ववन्ताविति द्वित्वविशिष्टप्रत्यक्षं अपेक्षाबुद्धिनाशश्च युगपत्, ततो द्वित्वनाशः । एवं द्वित्वप्रक्रिया । अयमेकोयमेक इति एकत्वत्रयावगाहिनीबुद्धिः, इमौ द्वावयमेक इति द्वित्वैकत्वावगाहिनी वा अपेक्षाबुद्धिः । ततस्त्रित्वनिर्विकल्पकं ततस्त्रित्वविशिष्टप्रत्यक्षं अपेक्षाबुद्धिनाशश्च युगपत्, ततस्त्रित्वनाशः । एवं त्रित्वप्रक्रिया । एवं चतुष्ट्वादिप्रक्रियाप्यूहनीया । द्वित्वादिविशिष्टप्रत्यक्षेप्यपेक्षाबुद्धिः कारणम् । तेन इतरेषां ज्ञानानां द्विक्षणावस्थायित्वेऽपि अपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वम् । अन्यथा द्वित्वदिविशिष्टप्रत्यक्षं न स्यात् । एकत्वञ्च नित्यानित्यभेदेन द्विविधम् । नित्यगतं नित्यम् अनित्यगतमनित्यम् । जन्यैकत्वं सर्वमाश्रयनाशमात्रनाश्यम् ।

अत्र <u>मीमांसकाः</u> । सङ्ख्यासामान्यं नित्यमेव[1] अपेक्षाबुध्यभावे द्वित्वादि प्रत्यक्षाभावस्तु अपेक्षाबुद्धेर्व्यञ्जकत्वादेवोपपन्नः । तस्य उभयसिद्धत्वात्तदुत्पत्तावपि तस्य हेतुत्वे तवैव गौरवादिति प्राहुः ।

<u>उत्तानास्तु</u> चतुर्विंशतिर्गुणाः पञ्च कर्माणि षड्रसा इत्यादि व्यवहाराणां [2]अपेक्षाबुद्धिविशेषविषयकत्वेनावश्यकत्वात् द्रव्येऽपि द्वित्वादिव्यवहाराणां अपेक्षाबुद्धिविषयकत्वेनोपपत्तौ द्वित्वादिसङ्ख्यायां मानाभावात् तद्धेतोरेवेति[3] न्यायादेकत्वमेव सङ्ख्या । न तु द्वित्वादिकमपीति वदन्ति ।

यत्तु एकत्वमपि तथेति । तत्तुच्छम् । तत्रापेक्षाबुद्धेरनियामकत्वेन तद्धेतोरेवेति न्यायाद्यभावेन तेन तस्यान्यथासिध्यसंभवात् । न च समवायः एकः सत्तैका, द्रव्यत्वमेकमित्यादिव्यवहाराणां का गतिरिति वाच्यम्, तत्र

1 यावदाश्रयभावीत्यर्थः न तु ध्वंसाप्रतियोगित्वरूपं नित्यत्वम् ।

2 विषयतासम्बन्धेनेत्यादिः ।

3 तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन इति न्यायः । द्वित्वादिहेतोः अपेक्षाबुद्धेरेव द्वित्वव्यवहारहेतुत्वे मध्ये द्वित्वादिना किमित्यर्थः ।

एकार्थसमवायादिसंबन्धेन एकत्वविषयकत्वस्वीकारात्। ननैवं 'षड्रसा' इत्यादि-व्यवहाराणां तथात्वापत्तिः। तत्र एकार्थसमवायादेव षड्रसादेरपि[षट्त्वादेरपि] सत्त्वादिति वाच्यम्। द्वित्वादीनां गगनकुसुमायमानत्वस्य विज्ञापितत्वात्॥

केचित्तु त्रित्वादिपरार्धपर्यन्तव्यापकं बहुत्वमिति कञ्चन सङ्ख्याविशेषं स्वीकुर्वन्ति। अत एव त्र्यादिपरार्धपर्यन्तेषु व्यवहार एकयैव शक्त्योपपन्नः। इतरथा बहुशब्दस्य नानार्थत्वप्रसङ्गादिति॥

अत्रेदं चिन्त्यम्, [1]कपिञ्जलाधिकरणविरोधात्, बहुत्वस्य शतसहस्रादिषु तुल्यत्वे प्रथमोपस्थितत्वादिलाघवानवकाशात्, त्रित्वादिपरार्धपर्यन्तमेव बहु-शब्देनाभिधीयते। तात्पर्यवशाच्च कदाचित् कस्यचिद्बोधः। बहुशब्दश्च नानार्थ एव। न्यायमते तु बहुत्वमतिरिक्तसङ्ख्येत्यत्र प्रमाणं मृग्यम्॥

परिमाणं चतुर्विधम्। अणु-महत्-ह्रस्व-दीर्घभेदात्। अणुत्वं च नित्यानित्यभेदेन द्विविधम्। पारिमाण्डल्याख्यपरमाणुपरिमाणं नित्यमेव। द्व्यणुकपरिमाणं चानित्यम्॥

ननु अणुपरिमाणे मानाभावः, परमाणुद्व्यणुकयोरेव मानाभावात्। अथ त्र्यणुकं सावयवं परिच्छिन्नमहापरिमाणवत्वात्[2] घटवत्। बहिरिन्द्रिय-प्रत्यक्षद्रव्यत्वाच्च। अत्र सन्दिग्धव्यभिचारवारणाय हेतौ महेति। गगनादौ तन्निरासाय परिच्छिन्नेति। आकाशादावनैकान्तिकत्वखण्डनाय द्वितीयहेतौ प्रत्यक्षेति। आत्मनि तत्प्रत्याख्यानाय बहिरिति। उपनीतभानादिकमा-दायाम्बरे तत्प्रत्याख्यानाय इन्द्रियेति। तथा च लौकिकप्रत्यक्षलाभान्न दोषः। एवं च द्व्यणुके सिद्धे तत् द्व्यणुकमपि सावयवम् महद्द्रव्यारम्भकत्वात्, तन्तुवत्, इत्यनुमानेन परमाणोस्सिद्धिरिति चेत्; न। उभयत्र महद्द्रव्य-

1 वसन्ताय कपिञ्जलानालभेत इत्यत्र किं त्रयाणामेवालम्भः उत त्रिप्रभृतीनामसङ्ख्यानामिति सन्देहे बहुत्वमात्रं हि शास्त्रार्थः। ततश्च त्रित्वेनैव शास्त्रार्थे सिद्धे नाधिकालम्भः। ऐच्छिकालम्भने अहिंसाशास्त्रविरोधादिति निर्णीतं पूर्वमीमांसायां एकादशप्रथमषष्ठे।

2 गगने व्यभिचारवारणाय परिच्छिन्नेति। परमाणुवारणाय महेति।

समवेतत्वस्योपाधित्वात् । न च समवेतत्वस्यैव सम्यक्त्वे शेषवयर्थ्यमिति वाच्यम् । व्यापके व्यर्थविशेषणत्वाभावात् साध्यसमनियत एवोपाधिरित्याचार्यमतेन[1] तथाभिधानात् । न च तथापि उपाधेर्द्रव्यत्वादौ सत्त्वेन साध्यासत्त्वेन उपाधेर्न तथात्वमिति वाच्यम् । महत्समवेतद्रव्यत्वस्य उपाधित्वादित्यर्थात् । एवं चाक्षुषसमवेतद्रव्यत्वं प्रत्यक्षसमवेतद्रव्यत्वं च उपाधिर्द्रष्टव्यः । त्रुटेः स्पार्शनत्वे तु स्पार्शनसमवेतद्रव्यत्वमपि उपाधिर्द्रष्टव्यः । वस्तुतस्तु समवेतत्वमेवोपाधिरिति चेत् ॥

अत्रोच्यते । त्र्यणुकं सावयवसमवेतं चाक्षुषद्रव्यत्वात्[2] घटवत् इत्यनुमानेन परमाणुद्व्यणुकयोर्युगपदेव सिद्धिः । न च समवेतत्वादिकमत्राप्युपाधिरिति वाच्यम् । तेषां साध्यव्यापकताग्राहकानुकूलतर्काभावेनाप्रयोजकत्वात् । न चेदमनुमानमप्रयोजकमिति वाच्यम् । त्र्यणुकं यदि सावयवसमवेतं न स्यात्, चाक्षुषद्रव्यं न स्यादिति तर्कस्य जागरूकत्वात् । न च तर्कोऽप्यप्रयोजक इति वाच्यम् । द्रव्यचाक्षुषे चक्षुस्संयोगस्य द्रव्यसमवेतचाक्षुषे च चक्षुस्संयुक्तसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे चक्षुस्संयुक्तसमवेतसमवायस्य कारणत्वमिति क्रमेण कार्यकारणभावकल्पनापेक्षया लाघवेन समवेतचाक्षुषे चक्षुस्संयुक्तसमवेतसमवायः कारणमित्येकस्य कार्यकारणभावस्य कल्पनाया एवोचितत्वात् । इत्थं च परमाणुद्व्यणुकानङ्गीकारे निरुक्तसन्निकर्षाभावेन त्र्यणुकं तत्समवेतरूपादिकं च चाक्षुषं न स्यात् । अधिकं च अस्मत्कृतलीलावतीरहस्येऽनुसन्धेयम् ॥

किं च,

जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणं तु त्रसरेणुं प्रचक्षते ॥
त्रसरेणुस्स विज्ञेयो येऽष्टौ स्युः परमाणवः ।
त्रसरेणवस्ते ह्यष्टौ रथरेणुरिति स्मृतः ॥

1 साध्यव्यापकत्वे सति साध्यव्याप्यत्वे च सति साधनाव्यापक उपधिरिति उदयनाचार्यमतम् ।

2 आत्मवारणाय चाक्षुषेति । रूपत्वादिवारणाय द्रव्येति ।

रथरेणवस्ते ह्यष्टौ वालाग्रं तत्स्मृतं बुधैः ।
वालाग्राण्यष्ट लिक्षा तु यूको लिक्षाष्टकस्स्मृतः ॥
अष्टौ यूका यवान् [यवं] प्राहुरङ्गुलं तु यवाष्टकम् ॥

इत्यादित्यपुराणमपि परमाण्वादौ प्रमाणं द्रष्टव्यम् । महत्वं च पृथिव्यां समनित्यमेव । अरत्निवितस्तिहस्तादिपरिमाणभेदेनानेकविधम् । तच्च महत्वं सङ्ख्यापरिमाणप्रचयभेदेन[1] त्रिविधम् । त्र्यणुकगतमहत्त्वं द्व्यणुकगतबहुत्वसङ्ख्याजन्यम्, द्व्यणुकपरिमाणस्याणुत्वेन महत्त्वानारम्भकत्वात्। चतुरणुकादिपरिमाणं तु स्वाश्रयसमवायिकारणपरिमाणजन्यम् । तूलपिण्डपरिमाणं तु प्रचयजन्यम् । प्रचयश्च प्रशिथिलावयवसंयोगः । प्रचयस्यैव तत्रान्वयव्यतिरेकाभ्यां कारणत्वावधारणात् तत्सहकृतत्वेन तत्परिमाणं तत्रान्यथासिद्धम् । द्व्यणुकपरिमाणं तु स्वाश्रयसमवायिकारण[परमाणु]गतद्वित्वजन्यम् ; परमाणुपरिमाणस्य काप्यकारणत्वात् । उक्तं च भाष्यकारेण[2] कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्य इति । ह्रस्वं च नित्यानित्यभेदेन द्विविधम् । नित्यगतं नित्यं तद्भिन्नमनित्यम् । महत्त्ववत् दीर्घमवगन्तव्यम् । पारिमाण्डल्यभिन्नपरिमाणं [3]सर्वमाश्रय[नाश]मात्रनाश्यम् ॥

अन्ये तु अपकृष्टपरिमाणविशेषेणैव [निर्वाहे] ह्रस्वदीर्घयोर्मानाभाव इत्याहुः ॥

दीधितिकृतस्तु परमाणुद्व्यणुकयोर्मानाभावेनाणुपरिमाणस्याप्यभावात् महत्त्वमेकमेव परिमाणमिति वदन्ति । पृथक्त्वं च एकपृथक्त्वद्विपृथक्त्वादिभेदेन बहुविधम् । एकपृथक्त्वं च नित्यानित्यभेदेन द्विविधम् । नित्यगतं नित्यमनित्यगतमनित्यम् । जन्यैकपृथक्त्वं सर्वमाश्रयनाशमात्रनाश्यम् ।

दीधितिकृतस्तु पृथक्त्वे मानाभावः । पृथग्व्यवहारस्यान्योन्याभावेनैवोपपत्तेः । न च पञ्चम्यनुपपत्तिः । घटादन्य इतिवदुपपत्तेरिति वदन्ति ॥

1 तत्तज्जन्यभेदेन ।
2 प्रशस्तदेवेन ।
3 परममहत्परिमाणभिन्नं चेत्यध्याहारः ।

अत्रेदं चिन्त्यम् । अन्यारादितरर्ते इत्यादिसूत्रे [पा. सू. २-३-२९.] अन्यपदस्य भिन्नादिपदयोगेऽपि पञ्चमीलाभाय असाधारणशक्यार्थपरत्वं वाच्यम्, तेन घटभिन्नं बुद्धिस्थीकृत्य 'घटस्स' इत्यादावपि न पञ्चम्यापत्तिः । न वा घटो न पट इत्यादौ तदापत्तिः । इत्थं च इतरपदवैयर्थ्यप्रसङ्गात् । पृथक्त्वस्य गुणत्वे तु तस्य तदर्थत्वेन तद्योगे पञ्चमीविधानेनैतस्य सार्थकत्वात् । न च अन्यपदस्य तदर्थत्वे विनादियोगे पञ्चमीविधानं व्यर्थमिति वाच्यम् । विनाशब्दस्य परित्यागार्थकत्वात् । परित्यागस्य च विभागभिन्नत्वाच्च न ध्रुवमपायेऽपादानमिति सूत्रेण चरितार्थता ॥

संयोगविभागौ च तज्जकर्मजभेदाद्द्विविधौ, उभावप्यनित्यौ । तत्र संयोगस्तु काठिन्यकोमळत्वभेदेन द्विरूपः । सोऽपि तरतमादिभेदेन बहुरूपः । सोऽपि नोदनाभिघातप्रशिथिलभेदेन त्रिविधः । प्रशिथिलसंयोगस्तु कोमळ एव ॥

अत्र वैशेषिकास्तु यत्र [हस्त]क्रियया हस्तपुस्तकसंयोगोत्पादकाल एव शरीरक्रिया तत्र कायपुस्तकसंयोगे जायमाने जातिसंकरप्रसङ्गात्[1], प्रतिबध्यप्रतिबन्धकभावस्य विनिगन्तुमशक्यत्वात्, तत्र संयोग[द्वय]स्य अननुभूयमानत्वात् संयोगद्वयस्य विरोधाच्च चित्रमेव संयोगं स्वीकुर्वन्ति ॥

कर्मजसंयोगविभागावपि द्विविधौ उभयकर्मजान्यतरकर्मजभेदेनेति सिद्धान्तः ।

नव्यास्तु उभयकर्मजस्थले अन्यतरकर्मजयोः[2] वारणाय (तत्र) [तत्तत्] क्रियाऽभावस्यापि कारणत्वकल्पने गौरवात्, क्रियायाः कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकत्वप्रसङ्गात्; अन्यतरत्वस्य कारणतावच्छेदककुक्षिनिक्षेपगौरवात्; क्रियाजन्यसंयोगविभागावेकविधावेव कल्प्येते, लाघवादित्याहुः ॥

ननु विभाग एव मानाभावः विभक्तव्यवहारस्य संयोगध्वंसेनैवोपपत्तेः । अत एव मेरुसिद्धार्थयोः न विभक्तव्यवहारः । न वा संयोगपूर्वकाले

1 कर्मसंयोगजन्यतावच्छेदकजातिभेदस्वीकार इत्यादिः ।

2 उभयकर्मजस्यापि एककर्मजत्वेन तज्जन्यतावच्छेदकप्रसक्तेः ।

[सः] । न चैवं संयोग एव मानाभावः । तद्व्यवहारस्य विभागप्रागभावेनैवोपपत्तेरिति वाच्यम् । प्रागभावे मानाभावात् । भावे वा तस्य प्रतियोगिचरमकारणव्यङ्ग्यत्वेन ततः पूर्वं तत्प्रत्यक्षव्यवहाराभावप्रसङ्गात् । न च नियमतो विधिमुखप्रत्ययवेद्यत्वात् न तस्याभावरूपत्वमिति वाच्यम् । तमसि व्यभिचारात् ॥

वस्तुतस्तु विभागस्यातिरिक्तत्वस्वीकारे द्विक्षणमात्रावास्थायित्वात्, चिरप्रोषितयोः कामिनीकामुकयोर्विभक्तव्यवहारात् तस्य च संयोगध्वंसविषयकत्वावश्यकत्वात् अन्यत्रापि स एव विषय इति किं विभागेन, न च विभागध्वंस एव तस्य तत्र विषय इति वाच्यम् । विनिगमनाविरहेण संयोगध्वंसविषयत्वस्याप्रत्यूहात्वादिति चेत् ॥

श्रृणु, अत्रोच्यते । सतस्ताव 'दिमौ विभक्तौ' 'इमौविभक्तौ' इत्येकाकारप्रत्यक्षव्यवहारो सर्वानुभवसिद्धो । न च तयोः संयोगध्वंसविषयत्वेनोपपत्तिः, ध्वंसानामनन्तत्वात्, तावद्ध्वंसं प्रत्यनुगतानतिप्रसक्तधर्माभावात् । ध्वंसस्य च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वाभावाच्च अतिरिक्तविभागसिद्धिरप्रत्यूहैव । विभागानामनन्तत्वेऽपि विभागत्वजात्या तदुपपत्तेः । न च तावद्ध्वंसान्यतमत्वमेव नियामकं, तदज्ञानेऽपि तद्व्यवहारात् ॥

एकदेशिनस्तु तन्नियामकत्वेन तावत् ध्वंसवृत्तिरखण्ड एव धर्मः कश्चन स्वीक्रियते । धर्मिकल्पनातो वरं धर्मकल्पनाया लघुत्वादिति वदन्ति ॥

परत्वापरत्वे च कालिकदैशिकभेदेन द्विविधे । कालिके च ते परमाणुव्यावृत्ते । दैशिके च सकलपृथिवीनिष्ठे । ते चानित्ये एव । न च परत्वाभाव एवापरत्वमिति वाच्यम्; अपरत्वाभाव एव परत्वमित्यपि वक्तुं शक्यत्वात्; विनिगमनाविरहात उभयोरपि सिद्धेः । वस्तुतस्तु कालिकपरत्वस्य दैशिकपरत्वस्य च नित्यविभुनि व्यतिरेकसत्त्वेन तत्रापि तद्व्यवहारप्रसंगात् ॥

अपरे तु परत्वापरत्वयोर्मानाभावः । अन्योन्याभावेनैव तद्व्यवहारोपपत्तेरिति । तन्न, नेदीयस्थे यूनि चापरत्वस्य दवीयस्थे स्थविरे च परत्वस्य

व्यवहारनैयत्यं न स्यात् । परस्परभेदस्य परस्परस्मिन् सत्त्वात् । किं च परत्वापरत्वव्यवहारयोः [1]अल्पाधिकतपनपरिस्पन्दसंयुक्तसंयोगापेक्षा च न स्यात् । अन्योन्याभावव्यवहारे तेषामप्रयोजकत्वात् । अपि च नित्ये अमूर्ते च तद्व्यवहारप्रसङ्गात् घटादिभेदस्य तत्रापि सत्त्वात् । मन्मते कालिकस्य दैशिकस्य च तस्याभावेनैव तदभावोपपत्तिरिति ॥

गुरुत्वं च नित्यानित्यभेदेन द्विविधम् । नित्यगतं नित्यम् । अनित्यं च माषपलादिभेदेन बहुविधम् । तच्चाश्रयमात्रनाश्यम् । द्रवत्वं चात्र नैमित्तिकम् ॥

संस्कारश्चात्र द्विविधः । वेगः स्थितस्थापकश्चेति । स चानित्य एव क्रियाजन्यत्वात् । क्रियाजनकोऽपि वेगः । तदुक्तं भाष्ये प्रशस्तपादाचार्यैः नोदनाद्यमिषोः कर्म, तत्कर्मकारिताच्च संस्कारात् तदुत्तरं कर्मेति । [2]स्थितस्थापकस्तु धनुरादिवृत्तिः । न तु पृथिवीसामान्यनिष्ठः । तदुक्तम् । स च स्पर्शवद्विशेषवृत्तिरिति ॥

सा च पृथिवी सावयवनिरवयवभेदेन द्विरूपा । निरवयवा परमाणुरूपा । अन्या सावयवा ॥

अत्र बौद्धाः सावयवपृथिव्यां मानाभावः । परमाणुपुञ्जेनैव तद्व्यवहारोपपत्तेः । न चैकः स्थूलो घट इति प्रत्यक्षानुपपत्तिरिति वाच्यम् । दूरस्थाप्रत्यक्षकेशस्य सजातीयसंवलनेन प्रत्यक्षवदुपपत्तेः । एकः स्थूलो धान्यराशिरिति विवेकभानोपपत्तेश्च । परिधानजलाहरणादिविचित्रकार्याणामपि तेनैवोपपत्तेः । घटपटादिव्यवहारादेरपि विचित्रसंवलनादेवोपपत्तेः । प्रतियोगीतरमुद्गरप्रहारादीनां तन्नाशकत्वकल्पनापेक्षया प्रतियोगिमात्रस्य तथात्वे लाघवात् अणुरपि क्षणिक एव । जगतः क्षणभङ्गुरत्वादिति वदन्ति ॥

1 कालिकापरत्वे अल्पतरपरिस्पन्दः कालिकपरत्वे बहुतरपरिस्पन्दः कारणम् । दैशिकापरत्वे अल्पतरसंयुक्तसंयोगः कारणम् । दैशिकपरत्वे बहुतरसंयुक्तसंयोगः कारणम् ।

2 पूर्वावस्थानभिन्नावस्थानापन्नस्य पूर्वावस्थानसम्पादको गुणः स्थितिस्थापकः ।

तत्तुच्छम्। परमाणोरतीन्द्रियत्वेन तत्पुञ्जीभूतघटादेरपि अप्रत्यक्षत्वप्रसङ्गात्। शतमप्यन्धा न पश्यन्तीति न्यायात् । न ह्येकमेव योग्यमयोग्यं च संभवति। न च केशप्रतिबन्दी, तस्यैव केशस्य सजातीयासंबन्धे साक्षात्कारस्वीकारात । परमाणोश्च तथात्वेऽपि प्रत्यक्षासंभवात्। न हि षण्ढः स्रक्चन्दनमलयानिलादौ सत्यपि कुङ्कुमारुणां तरुणीमुपभोक्तुं क्षमते । कुमारस्तु यौवने सति तस्मिन् सति क्षमत एव। किं च सजातीयसम्मेळनस्य न कारणत्वं द्व्यणुकप्रत्यक्षत्वप्रसङ्गात् । किं तु भूयस्सजातीयसंयोगस्य हेतुत्वं वाच्यम् । तथा च तदपेक्षया लाघवात महत्त्वस्यैव तथात्वौचित्यात् । जगतः क्षणभङ्गुरत्वं प्रत्यभिज्ञाविरोधेनैव निरस्तम् । न चास्मन्मत इव त्वन्मतेऽपि सैवेयं दीपकलिकेतिवत् प्रत्यभिज्ञायास्तज्जातीयत्वावगाहित्वसंभवः । तव जातेरळीकत्वात् ॥

एतेन अन्त्यावयविभिन्नतन्त्वाद्यवयविसत्त्वेऽपि तन्त्वादिभिन्नपटाद्यवयविनिर्माणाभाव इति वेदान्तिनामर्धजरतीयमतमपास्तम् ॥

परमाणुद्व्यणुकयोर्मानाभावेन त्रुटेरेव निरवयवत्वेन नित्यत्वात् प्रत्यक्षत्वाच्च त्रुटिपुञ्ज एव घटादीति नोक्तबाधकक्लेशावकाश इति नवीनवेदान्तिनः । तदपि चिन्त्यम् । क्रियासमभि(व्या)हारेण परमाणुद्व्यणुकयोर्मानस्य निवेदितत्वात् । किं च घटादौ सूक्ष्मावयवावच्छेदेन चक्षुस्संयोगेन तत्प्रत्यक्षाभावेन भूयस्त्वव्यवच्छेदेन तस्य तथात्वं कल्प्यम् त्रुटिभिन्नचाक्षुषे, अन्यथा तव त्रुटावेव व्यभिचारात् । तथा च लाघवाद्द्रव्यचाक्षुष एव भूयोऽवयवावच्छेदेन चक्षुषस्संयोगस्य कारणत्वकल्पनौचित्यात् । अपि च त्रुटेरस्पार्शनत्वेन घटादेरपि अस्पार्शनत्वप्रसङ्गात् त्रुटिपुञ्जभिन्नघटाद्यवयविसिद्धिरिति सर्वमवदातम् ॥

षोढा रूपरसौ पृथक्त्वगुरुता सङ्ख्यास्तथा नैकधा
संस्काराः परतापरत्वसुरभिस्पर्शा द्विधा च द्विधा ।
संयोगश्च विभाग एष परिमाणं वा चतुर्धैकधा
षट् चाष्टौ च गुणा द्रवत्वमनिशं भासन्त इत्थं क्षितौ ॥

अथ जलनिरूपणम्

जलं च रसनेन्द्रियशरीरसरित्समुद्रहिमकरकादिप्रभेदेन बहुविधम् । तच्च गन्धवर्जस्नेहयुक्तपूर्वोक्तचतुर्दशगुणवत् । रसनेन्द्रियस्य अतीन्द्रियत्वं च घ्राणवत् । तच्च आप्यं, [1]रूपादिषु पञ्चसु रसस्यैवाभिव्यञ्जकत्वात् लालावत्, इत्यनुमानेन तस्य आप्यत्वं सिद्धम् । तच्च रसनाग्रवर्त्ती, शरीरं च वरुणलोके प्रसिद्धम् । सरित्समुद्रौ तु प्रसिद्धौ । हिमकरकयोस्तु शीतस्पर्शत्वादाप्यत्वम् । न च चन्दनचन्द्रप्रभाप्रभञ्जनादौ व्यभिचारः । तत्र शैत्यस्य औपाधिकत्वात्[2] । न च घर्षकजलापेक्षया चन्दने अधिकशैत्योपलम्भात् नैवमिति वाच्यम् । वायुवत् चन्दनस्यापि तच्छैत्याभिव्यञ्जकत्वात् ॥

रूपं च तत्र शुक्लमभास्वरम् । तरतमादिशून्यं एकजातीयमेवापाकजम् । न चाकूपारकालिन्दीजलादावपि कालिमोपलब्धेर्नैवमिति वाच्यम् । भूभाग-संबन्धोपाधिकत्वात् । अत एव वियति विक्षिप्तानां कालिन्दीजलानां धवलिमोपलम्भः । न च तत्रापि तेजस्सम्बन्धौपाधिकत्वमिति वाच्यम् । नीलस्याप्युपलम्भप्रसङ्गात् । नीलोपलम्भजनकत्वेन तस्य तदभिभावकत्वा-संभवात् ॥

रसोऽपि तरतमादिशून्यः एकजातीयमधुर एव । लवणाद्युपलम्भस्तु औपाधिकः । ननु तत्र मधुररससत्त्वे मानाभाव द्राक्षेक्षुक्षीरादाविव तत्र माधुर्यानुपलम्भात् । ननु अनुद्भूत एव तत्र रस इति चेत्, न, तेजःप्रभृतिष्वपि तत्प्रसङ्गात् । तिक्तादिवेदनविलक्षणवेदनमेव माधुर्ये मानमिति चेन्न । माधुर्यादि-वेदनविलक्षणवेदनमेव तिक्तादिरसवत्त्वे मानमिति तिक्तादीनामप्यत्रसिद्धिप्रसङ्गात् । न चैक्षवरसादौ माधुर्योपलम्भात् तत्रापि तथात्वं कल्प्यत इति वाच्यम् । निम्बजम्बीरशृङ्गिबेराकूपारादिजलादौ तिक्तादीनामप्युपलम्भात् षड्रसस्यापि तत्र

1 मनसि व्यभिचारवारणाय एवकारः । रसत्वादिव्यञ्जकत्वेन असिद्धिवारणाय रूपादिष्विति । गगनादिवारणाय विशेष्यम् । अत्रापि हेतुत्रये तात्पर्यम् ।

2 जलगतशैत्यस्य स्वाश्रयसंयुक्तत्वसम्बन्धेन चन्दनादौ भानमित्यर्थः । यद्वा भ्रम एव चन्दनादौ तादृशी प्रतीतिः । तत्र कारणं उक्तसम्बन्धेन शैत्यम् ।

सिद्धिप्रसङ्गात् । न च तिक्ताद्युपलम्भा निम्बाद्यौपाधिका इति वाच्यम् । माधुर्योपलम्भस्यापि इक्ष्वाद्यौपाधिकत्वात् । न च हरीतकीभक्षणानन्तरमुपलभ्यमानपानीयरसस्य मधुरत्वेन सर्वानुभवसिद्धत्वात् तथेति वाच्यम् । कर्कटीभक्षणानन्तरमुपलभ्यमानपानीयरसस्य तिक्तत्वेन सर्वानुभवसिद्धत्वेन तस्यापि तत्र सिद्धिप्रसङ्गात् । यदि च कर्कट्यवयवनिष्ठतिक्तरस एव तेनाभिव्यज्यते । कर्कटीभक्षणजनितरसनागतपित्तद्रव्यनिष्ठतिक्तरस एव वा तेनाभिव्यज्यत इति, तदा हरीतक्याद्यवयवसमवेतमधुर[रस एव], तज्जनितरसनासम्बन्धिमधुरद्रव्यगतरस एवाभिव्यज्यत इत्यपि वक्तुं शक्यत्वात् षड्रसवत्त्वं नीरसत्वं वा जले इति चेत्;

अत्र वदन्ति । कुन्तळसीमन्तिनीकान्तास्तनतटसङ्क्रान्तकुङ्कुमपङ्कविलिप्तगात्राः निरन्तररतिसमरसंरम्भपरिश्रान्ताः अतिस्निग्धसुधाधवळितविधुमण्डितसौधाङ्गणकुट्टिमाधिष्ठितनिर्मलस्फटिकचषकविधृतधाराधरधारासु निरुपाधिकमाधुर्यमनुभवन्ति रसिकजना इति । इत्थं चात्र माधुर्यस्य निरुपाधिकत्वात् रसान्तरस्यापि कल्पनागौरवात् सर्वत्र मधुररस इति । स्पर्शस्तु शीतः । तरतमादिभेदेन बहुविधः ॥

यत्तु वाते वाति सति यादृश एव शीतस्तूपलभ्यते न तादृश एव सर्वत्र जले; परं तु वायुसंयोगोऽभिव्यञ्जकः । यत्र तु न तादृशसंयोगः तत्र न तत्प्रत्यक्षमिति तच्चिन्त्यम् । तादृशवाताभावे शीतप्रत्यक्षाभावप्रसङ्गात् । तद्व्यञ्जकाभावात् तत्र शीतान्तराभावाच्च । स्पर्शस्तु सङ्ख्यादयस्तु पूर्ववद्बोध्याः । संयोगोऽपि तत्र न कठिनः, अपि तु सुकुमार एव । द्रवत्वं सांसिद्धिकम् । रूपादिचतुष्टयम् ॥

द्रवत्वं च नित्यगतं नित्यमनित्यगतमनित्यमिति ।
सङ्ख्यादयः पूर्ववच्च जले भान्ति चतुर्दश ॥
अनित्यनित्यभेदेन द्वेधा रूपादिपञ्चकम् ।

इति जलनिरूपणम्

अथ तेजोनिरूपणम्

तेजः चक्षुरिन्द्रियशरीरसुवर्णसवितृवह्निविद्युदादिभेदेन बहुविधम् । चक्षुरिन्द्रियस्यातीन्द्रियत्वं पूर्ववत् । तच्च तैजसं [1]रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वात् आलोकवत्, इत्यनुमानेन तस्य तैजसत्वसिद्धिः । तच्च कृष्णताराग्रवर्ति ॥

ननु गोळकातिरिक्तचक्षुरिन्द्रियसद्भावे मानाभावः । इन्द्रियस्य संबद्धार्थग्राहकत्वमसिद्धमप्रयोजकं च । अत एव शाखाचन्द्रमसोरपि समसमयग्रहणमुपपद्यते । अन्यथा शाखासंयोगानन्तरं प्रहरावधि विळम्बेन क्रियाविभागादिक्रमेण संयोगस्य सम्भावितत्वेन सर्वानुभवसिद्धसमसमयग्रहणमनुपपन्नमेव स्यात् । न च कुड्यादिव्यवहितघटादिप्रत्यक्षतापत्तिरिति वाच्यम् । आवरणाभावस्यापि तत्र कारणत्वात् । तस्य तवापि चक्षुर्गतिकारणत्वस्य क्लृप्तत्वादिति चेत् ॥

उच्यते । प्रसवान्धस्यापि घटादिचक्षुषापातात् तस्यापि गोळकस्य सत्त्वात् । न चादृष्टविशेषाभावादेव तस्य चाक्षुषाभावोपपत्तिरिति वाच्यम् । इन्द्रियान्तराणामपि विलयप्रसङ्गात्; दृष्टेनैवोपपत्तौ अदृष्टकल्पनोच्छेदप्रसङ्गाच्च । शाखाग्राहकचक्षुरपेक्षया चन्द्रग्राहकचक्षुषोऽतिवेगवत्त्वेन समसमयग्रहणोपपत्तेः । अत एव कदाचित् क्रमिकग्रहणमुपपद्यते । तदानीं तस्य वेगवत्त्वाभावात् । किं च आवरणाभावस्य घटपटादिसाधारणगतिसामान्यं प्रत्येव कारणत्वात् । चक्षुर्गतिं प्रत्यपि पार्थक्येन तस्य कारणत्वाकल्पनात् । तस्य चाक्षुषं प्रत्यपि कारणत्वकल्पने तवैव गौरवात् ॥

शरीरं च स्वर्गादौ प्रसिद्धम् । तच्च तेजो रूपस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारैकादशगुणवत् । रूपं च शुक्लं भास्वरं एकजातीयमेव । भास्वरत्वं च स्वपरप्रकाशकत्वम् । स्पर्शोऽप्युष्णः । एक-

1 मनसि व्यभिचारवारणाय एवकारः । असिद्धिवारणाय मध्ययान्तम् । अत्रापि हेतुत्रये तात्पर्यम् ।

जातीय एव। तदुभयं नित्यगतं नित्यम्, अनित्यगतमनित्यम्। द्रवत्वं च नैमित्तिकम्। अवशिष्टं पूर्ववत्। सुवर्णं च प्रसिद्धम् ॥

ननु न सुवर्णं तैजसम्, अपि तु पार्थिवं प्रथिमाधिकरणत्वात्, गुरुत्वाधिकरणत्वात्, अनुष्णाशीतस्पर्शवत्त्वात् कठिनसंयोगवत्त्वाच्च। न च तदतिरिक्तस्तदुपष्टम्भकः कश्चन तेजोभागः सुवर्णपदवाच्योऽस्तीति वाच्यम्। अनुपलम्भात् कल्पनायां च मानाभावात् इति चेत् ॥

अत्र वदन्ति।

पीतिमा च गुरुत्वं च दाहे यत्र च शक्तिमा।
तस्य लोकप्रसिद्धस्य स्वर्णत्वं केन वार्यते ॥

इत्यागमप्रत्यक्षसिद्धः सुवर्णपदवाच्यः कश्चन पार्थिवो भागः। अपरश्च "अग्नेरपत्यं प्रथमं हिरण्यम्" "तेजो हिरण्यम्" इत्यादिश्रुतिसिद्धः कश्चन तेजोभागः सुवर्णपदवाच्यः। अनुमानं च [1]पीतिमाधिकरणं सुवर्णं द्रवद्रव्योपष्टब्धम् [2]अत्यन्ताग्निसंयोगे सत्यपि अनुच्छिद्यमानद्रवत्वाधिकरणत्वात् क्वथ्यमानजलमध्यस्थितघृतवत्। तच्चोपष्टम्भकद्रव्यं न पार्थिवम् अनवस्थानात्। नाप्याप्यं नैमित्तिकद्रवत्वाधिकरणत्वात्। पारिशेष्यात्तस्य तैजसत्वसिद्धिः ॥

सुवर्णं न पार्थिवं न वा तैजसम्, न वा द्रव्यद्वयम्, अपि तु अतिरिक्तद्रव्यमिति केचित्। अन्ये च सौरादयः प्रसिद्धाः ॥

वह्निश्चतुर्विधः। भौमदिव्यौदर्याकरजभेदात्। तत्र भौमः प्रसिद्धः। दिव्योऽशनिपातजः। औदर्यो जाठरानलः। आकरजो वडवानलः। सोऽप्यबिन्धनः ॥

तदपि तेजः पञ्चविधम्। उद्भूतरूपस्पर्शमनुद्भूतरूपस्पर्शम् उद्भूताभिभूतरूपस्पर्शम् उद्भूतरूपमनुद्भूतस्पर्शम् अनुद्भूतरूपमुद्भूतस्पर्शं चेति। तत्र

1 तेजोभागेऽपि सुवर्णपदवाच्यत्वसत्त्वादुक्तं—पीतिमेति।

2 अग्निसंयोगासहकृतघृते व्यभिचारवारणाय विशेषणम्। यथाकथंचिदग्निसंयुक्त तत्रैव वारणाय— अतीति। केवलघृते व्यभिचारवारणाय विशेष्यम्।

आद्यं वह्न्यादिकं । द्वितीयं चक्षुरादिकम् । तृतीयं सुवर्णम् । चतुर्थं प्रदीपप्रभादिकम् । पञ्चमं भर्जनकपालस्थवह्न्यादिकम् । प्रभातेजसोरूपमिति टीकाकृतः । तन्मते तु चतुर्विधं बोध्यम् ॥

तेजः पञ्चविधं प्रोक्तं गुणा ह्येकादश स्मृताः ।
भासन्ते तत्र नूनं ते नित्यं रूपादयो बुधैः ॥

अथ वायुनिरूपणम्

वायुस्त्वगिन्द्रियशरीरप्राणवातवात्यादिभेदेन नानाविधः ॥

ननु वायोरतिरिक्तद्रव्यत्वे मानाभावः । भूविशेषेणैव तद्व्यवहारोपपत्तेः । न च उद्भूतस्पर्शवत्पृथिव्या उद्भूतरूपवत्त्वनियमात् न तस्य पृथिवीत्वमिति वाच्यम् । अप्रयोजकत्वात् । अन्यथा उद्भूतरूपवत्पृथिव्याः उद्भूतस्पर्शत्व-नियमात् नयनगतपित्तद्रव्यबाष्पादेरतिरिक्तद्रव्यत्वप्रसङ्गात् । अन्यथा तव तमसोऽपि पृथिवीत्वप्रसङ्गात् । न च तिर्यग्गमनस्वभावत्वान्नैवमिति वाच्यम् । वात्यादौ तदभावात् कदाचित् तिर्यग्गमनस्य काण्डा[का]दावपि सत्त्वात् । न च गुरुत्वाभान्नैवमिति वाच्यम् । गुरुत्वस्य पृथिवीत्वव्यापकत्वे माना-भावात् । भावे वा धूमबाष्पादाविव तत्रापि गुरुत्वस्वीकारे बाधका-भावात् । तद्वदेव तत्कार्यपतनाभावस्याप्युपपत्तेः । न च गन्धाभावान्नैवमिति वाच्यम् । सुरभिः समीरण इति प्रतीत्या गन्धस्यापि तत्र सत्त्वात् । रसवत्त्वं पाषाणादिवदुपपन्नम् । कठिनसंयोगाभावोऽपि धूमवदुपपन्नः । एवं द्रवत्वा-भावोऽपि द्रष्टव्य इति चेत् ॥

उच्यते । त्वगिन्द्रियं न पार्थिवं गन्धानभिव्यञ्जकत्वात् । चक्षुर्वत् । रूपरसशब्दानभिव्यञ्जकत्वेन तेजःप्रभृतिभिन्नत्वे सिद्धे परिशेषात्तस्यातिरिक्त-द्रव्यत्वे सिद्धे तस्य स्पर्शग्राहकस्य सर्वानुभवसिद्धत्वात् वातादिकमपि न पृथिव्यादिकम् । किं तु त्वगिन्द्रियजातीयं स्पर्शाभिव्यञ्जकत्वात् त्वगिन्द्रिय-वत् इत्यनुमानेन इतरेषामपि तथात्वसिद्धिः । स च वायुरतीन्द्रियः । उद्भूत-रूपाभावात् । कालादिवत् ॥

अत्र मीमांसकाः—वायुस्तु त्वगिन्द्रियप्रत्यक्षः [प्रत्यक्ष]स्पर्शाश्रयत्वात्[1] घटवत् । अन्यथा घटादिरपि स्पार्शनो न स्यात् । तत्रापि स्पर्श एव स्पार्शनः [न] घटादिरित्यपि तुल्यत्वात् । द्रव्यस्पार्शने उद्भूतस्पर्शस्य कारणत्वेन सामग्र्या अप्युभयत्र समानत्वात् । बहिर्द्रव्यप्रत्यक्षे उद्भूतरूपस्य कारणत्वे मानाभावात् । अन्यथा उद्भूतस्पर्श एव तत्र कारणमिति किं न स्यात्? विनिगमनाविरहात् । न च प्रभाबाष्पनयनगतपित्तद्रव्यादौ स्पर्शव्यभिचार इति वाच्यम् । भर्जनकपालस्थवह्निचन्द्रप्रभाप्रभञ्जनानीतशीतोष्णभागादौ रूपस्यापि व्यभिचारात् । पक्षसमत्वं च उभयत्रापि साम्यम् । न च प्रभादीनां प्रत्यक्षत्वं सर्वानुभवसिद्धमिति वाच्यम् । तत्रापि रूपमेव प्रत्यक्षम्, न तु द्रव्यमपि, तुल्ययोगक्षेमत्वात् । एतेन विनिगमनाविरहात् उभयोरपि नियामकत्वेऽपि वायुर्न प्रत्यक्ष इति शशधरमतमपास्तम् । उभयोरपि (द्रव्य)व्यभिचारस्य निवेदितत्वात् । तस्माद् द्रव्यचाक्षुषे उद्भूतरूपं द्रव्यस्पार्शने उद्भूतस्पर्शः कारणमित्येव कार्यकारणभावः । न तु बहिर्द्रव्यप्रत्यक्षे किञ्चित्कारणं मानाभावात् । अत एवोक्तानुमाने उद्भूतरूपमुपाधिरिति निरस्तम्, साध्याव्यापकत्वादिति प्राहुः । एतदेव दीधितिकृतामपि मतम् । अधिकं चास्मत्कृतलीलावतीरहस्ये अनुसन्धेयम् ॥

गन्धोपलम्भश्च तत्र औपाधिकः । चम्पकगन्धः कर्पूरगन्धः समीरण इत्याद्युपाधिसंभेदेनैव तत्र तत्प्रत्ययात् ॥

ननु चम्पककर्पूरादीनां दूरस्थत्वेऽपि गन्धानुभवस्य सर्वानुभवसिद्धत्वात् इन्द्रियाणां च संबद्धार्थग्राहकत्वात् वायावेव तज्जातीयगन्धः स्वीक्रियते । न च वायुना चम्पककर्पूरभागा आनीयन्त इति वाच्यम् । चम्पकादीनां सच्छिद्रत्वप्रसङ्गात् । कर्पूरादीनां माषादेस्त्रुटिप्रसङ्गात् । न च वायुना अपरभागा आनीय पुनः पूर्यन्त इति वाच्यम् । अस्माभिस्तथाकृतेऽपि सच्छिद्रता न्यूनता च न स्यादिति चेत् ॥

1 त्वगिन्द्रियादौ व्यभिचारवारणाय प्रत्यक्षेति। प्रत्यक्षद्रव्यत्वाश्रये कालादौ तद्वारणाय स्पर्शेति ।

अत्राहुः । किमिदं सच्छिद्रत्वम् । अन्तर्निहितद्रव्यपतनप्रतिबन्धकसंयोगशून्यत्वं वा, अन्तर्निहितद्रवद्रव्यपतनप्रतिबन्धकसंयोगशून्यत्वं वा, प्रशिथिलावयवसंयोगशून्यत्वं वा, मध्यमसंयोगशून्यावयवकत्वं वा, पूर्वापेक्षया न्यूनावयवत्वं वा ? नाद्यौ, प्रान्तभागानयनेऽपि सच्छिद्रत्वापादनं न स्यात् । न तृतीयतुरीयौ, असिद्धेः । नान्त्यः, अवयवावयवानयनेऽपि सच्छिद्रत्वापादनं न स्यात् । तस्मात् वायुना चम्पकादिभागा एवानीयन्त इत्यभ्युपेयते । वस्तुतस्तु, तत्परागानयने तु न कोऽपि दोषः । भवनोदरमधिवासयति कर्पूरादौ का गतिरिति चेदित्थम्—यथा परापरभागपूरणेनाध्यात्मिकवायुः न्यग्रोधाङ्कुरकरीरादिकमिन्द्रेन्दुमुखबृन्दारकवृन्दमन्दिरचुम्बिनं विशालविविधविटपपरिवीतं महान्तं पादपं विदधाति । न तु मादृशैश्छिन्ने, तथैव स्वेन घनसारानयने परापरभागान् अन्यूनातिरिक्तान् पूरयति । न तु मादृशैर्निहितायां हिमवालुकायामिति गतिं गृहाणेति सर्वं रमणीयम् ॥

ननु चर्मातिरिक्तत्वगिन्द्रियसद्भावे मानाभावः । एवं च पार्थिवमेव त्वगिन्द्रियमिति चेन्न । त्वगिन्द्रियं न पार्थिवम्, अपि तु वायवीयम्, गन्धानभिव्यञ्जकत्वे सति स्पर्शाभिव्यञ्जकत्वात्[1] । अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवदिति मानस्य जागरूकत्वात् । किं च, कुष्ठविशेषवतः सर्पदष्टस्य किणाङ्कस्य जन्तोस्तदवच्छेदेन घटादिसंयोगे सति स्पार्शनप्रत्यक्षप्रसङ्गात्, चर्मणस्सत्त्वात् । शरीरं च प्रसिद्धं पैशाचम् । अन्ये च प्रसिद्धाः । स च स्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारनवगुणवान् । स्पर्शस्तु अनुष्णाशीतोऽपाकजश्च । 'शीतो वायुः' 'उष्णो वायुः' इत्याद्युपलम्भस्त्वौपाधिकः । शेषं पूर्ववदिति सङ्क्षेपः ॥

स्पर्शादयो नव गुणा भान्ति वायौ पुरैव हि ।
तदन्यत्वे[2] प्रमाणं तु तस्य विज्ञापितं बुधैः ॥

---

1 मनोवारणाय विशेषणम् । गगनवारणाय विशेष्यम् ।
2 A reads—तथान्यत्वे ।

आकाशं विभु एकं नित्यम् । तच्च संख्यापरिमाणपृथक्त्वसंयोगविभागशब्दाख्यषड्गुणवत् । शब्दश्च तत्र तारमन्द्रतरतमादिभेदेन नानाविधः । स च सर्वोऽप्यनित्यः । नित्य इति मीमांसकाः । भाट्टवेदान्तिनौ तु द्रव्यमिति वदतः ॥

ननु ईश्वरातिरिक्ताकाशसद्भावे मानाभावः । शब्दाश्रयत्वमपीश्वरस्य कल्प्यते । द्रव्यान्तरकल्पने गौरवात् । न च जीवानादाय विनिगमनाविरह इति वाच्यम् । जीवस्य तदाश्रयत्वे कल्प्यमाने कारणत्वं समवायित्वं द्वयं कल्पनीयम् । तथा च कारणत्वेन क्लृप्तस्यैवेश्वरस्य समवायित्वमात्रकल्पनौचित्यात् । [1]केषाञ्चिन्मते जीवस्य परिच्छिन्नत्वेन सर्वत्र शब्दानुत्पादप्रसङ्गात् । शब्दस्य मनोवेद्यत्वप्रसङ्गाच्च । आकाशपदवाच्योऽपि ईश्वर एव । वेदान्तिभिरपि '[2]आकाशस्तल्लिङ्गात्' इत्यधिकरणे आकाशशब्दस्य ईश्वरवाचकत्वं व्यवस्थापितम् । महेश्वरेऽष्टौ गुणा इति सिद्धान्तस्य च निर्युक्तिकत्वेन अश्रद्धेयत्वात् । श्रोत्रेन्द्रियमपि कर्णशष्कुल्यवच्छिन्नेश्वर एव । न चेन्द्रियस्यासाधारणकारणत्वात् ईश्वरस्य साधारणकारणत्वात् तयोश्च विरुद्धत्वान्नाकाशमीश्वर इति वाच्यम् । तयोर्विरुद्धत्वे मानाभावात् । अन्यथा कालदिगादेः स्वसमवेतसंयोगविभागद्वित्वादावसाधारण[कारण]त्वं न स्यात् । अदृष्टादेः स्वर्गादिकं प्रति असाधारणत्वं न स्यात् । तयोः साधारणकारणत्वादिति चेत् ॥

मैवम् । 'आकाशस्तल्लिङ्गात्' इत्यधिकरणविरोधात् । अत्र ह्याकाशशब्दो भूताकाशपरः आत्मपरो वेति सन्देहे, प्रसिद्धत्वात् भूताकाशपर इति

1 माध्वादीनां मते जैनमते च ।

2 "आकाश इति होवाच सर्वाणि हवा इमानि भूतानि आकाशादेव समुत्पद्यन्ते" इत्यत्र आकाशशब्दः परमात्मपर इति प्रथमप्रथमाहमेनिर्णीतम् ।

पूर्वपक्षे च जगत्कारणत्वसत्यकामादिलिङ्गात्[1] न भूताकाशपरः । किं त्वात्मपर इति सिद्धान्तितम् । एवं चात्मभिन्नाकाशानङ्गीकारे संशयपूर्वपक्षयोरभावेन तदधिकरणभङ्गप्रसङ्गो दुर्वारः, अधिकरणलक्षणाभावात् ॥

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः ।
प्रयोजनं च पञ्चैते प्राञ्चोऽधिकरणं विदुः ॥

इत्येव हि अधिकरणलक्षणम् । तच्चाकाशं नित्यम्, निरवयवद्रव्यत्वात्, आत्मवत् । घटादौ व्यभिचारवारणाय निरवयवेति । घटरूपादौ तन्निरासाय द्रव्यत्वेति । अनेनानुमानेन तस्य नित्यत्वम् । अन्यथा उत्पत्तिविनाशकल्पने गौरवात् ॥

वेदान्तिनस्तु "आत्मन आकाशः सम्भूतः" इत्यादिश्रुतिबलादनित्यमेव तदाकाशमिति स्वीकुर्वन्ति । [2]केचित्तु आवरणाभाव एव आकाशः, न तु द्रव्यमित्याहुः ॥

तदप्येकम्, भेदे प्रमाणाभावात्, गौरवाच्च । विभु च तत्, सर्वत्र कार्योपलम्भात् । तदेव श्रोत्रेन्द्रियम् ।

ननु श्रोत्रेन्द्रियं नाकाशः, अपि तु द्रव्यान्तरम् । तत् चक्षुरादिवत् प्रतिपुरुषं भिन्नम् । तच्चानित्यम् । अन्यथा बाधिर्यानुपपत्तेः । अत एव न कर्णः श्रोत्रेन्द्रियम् । न चादृष्टविशेषाभावादेव बाधिर्योपपत्तिरिति वाच्यम् । तत्तदधिष्ठानातिरिक्तेन्द्रियाणां सर्वेषामेव विलयप्रसङ्गात् । न च रूपादिपञ्चसु मध्ये यदिन्द्रियं यद्गुणग्राहकं तदिन्द्रियं तद्गुणवत् । यथा चक्षुः रूपवदित्यनुमानेन तेषां शब्दाश्रयत्वे सिद्धे आकाशस्यापि तदाश्रयत्वे

1 इदं चिन्त्यम् । आकाशवाक्ये सत्यकामत्वाश्रवणात् । यद्वा दहराकाशप्रकरणे सत्यकामत्वश्रवणात् तदभिप्रायेणेदम् ।

2 बौद्धाः ।

मानाभावेन भेर्यादिदेशे शब्दोत्पत्तिर्न स्यादिति वाच्यम् । अप्रयोजकत्वात् । अन्यथा यदिन्द्रियं यद्गुणग्राहकं तदिन्द्रियं तद्गुणवदिति सामान्यव्याप्त्या मनसोऽपि ज्ञानादिमत्वप्रसङ्गात् । तथा आकाशसमवेत एव शब्दः संयुक्त-समवायसन्निकर्षेणैव श्रोत्रेन्द्रियेण गृह्यते । चक्षुरादिना रूपादिवत् । न चातिरिक्तानन्तकोटिद्रव्यकल्पने गौरवमिति वाच्यम् । इन्द्रियान्तराणामपि विलयप्रसङ्गात् इति चेत् ॥

मैवं । क्लृप्तेनैवोपपत्तौ अक्लृप्तकल्पनाया अन्याय्यत्वात् । अन्यथा इन्द्रियान्तराणामपि अतिरिक्तद्रव्यत्वप्रसङ्गात् । न च सर्वेषां सर्वशब्दोप-लब्धिप्रसङ्गः । तस्य गगनस्य एकत्वादिति वाच्यम् । कर्णशुष्कुल्य-वच्छिन्ननभस एव श्रोत्रत्वात् । न च विशिष्टस्य अनतिरिक्तत्वात् स दोषस्तदवस्थ इति वाच्यम् । शब्दस्याव्याप्यवृत्तित्वेन देशान्तरोत्पन्नस्य कर्णशष्कुल्यवच्छेदेन नभस्यभावात् । शाखावच्छिन्नवृक्षवृत्तिकपिसंयोगस्य मूलावच्छेदेन वृक्षे अभाववत् । न च भेर्यादिदेशे उत्पन्नस्य शब्दस्य श्रोत्रदेशे अभावात् कथं तच्छब्दग्रह इति वाच्यम्, वीचीतरङ्गन्यायेन श्रोत्रदेशपर्यन्तमेव शब्दजशब्दधारास्वीकारात् । 'भेरीशब्दो मयाश्रुत' इति धीः भ्रान्तैव, 'सैवेयमिन्दीवरकलिका 'इति[1] प्रत्यभिज्ञानवत् तज्जातीयत्वाव-गाहिनी वा । शेषं शब्दनिरूपणे वक्ष्यामः ॥

ननु भेर्यादिकमेव शब्दसमवायि । अत एव घनशब्दो घण्टाशब्दः शङ्खशब्दो वीणाशब्द इति प्रत्ययाः । इत्थं च चक्षुरादिरिव वेगवच्छोत्रम् अधिष्ठानभेर्यादिसंबद्धं सदेव शब्दग्राहकम्; अतिरिक्तद्रव्यमेव श्रोत्रेन्द्रियम् । अत एव 'भेरीशब्दो मया श्रुतः' इति प्रत्ययोऽपि समीचीनः । अत एव शब्दजशब्दधाराक्लेशोऽपि नास्ति । एतेनानन्तेन्द्रियकल्पनागौरवमपि निरव-काशम् । अनन्तकोटिशब्दजशब्दकल्पनापेक्षया प्राणिसमसङ्ख्याकश्रोत्रेन्द्रिय-युगळकल्पनाया एव लघुत्वात् । न च भेर्यादीनामनन्तानां शब्दं प्रति समवायिकारणत्वकल्पनापेक्षया एकस्यैवाकाशस्य समवायिकारणत्वं लध्विति

1 A reads—दीपावालेति ।

वाच्यम् । समवायिकारणत्वापेक्षया निमित्तकारणत्वस्य गुरुशरीरत्वेन तेषां निमित्तकारणत्वस्य गगनस्य समवायिकारणत्वस्य च कल्पनामपेक्ष्य तेषामेव समवायिकारणत्वकल्पनाया लघुत्वात् । किं च भेर्यादीनां कारणत्वस्य उभयसिद्धत्वात् तेषां अवच्छेदकत्वकल्पनायाः समवायित्वकल्पनायाः साम्येऽपि नभसः समवायित्वस्य कारणत्वस्य च कल्पने तवैव गौरवात् । अपि चानन्तानां कर्णशष्कुलीनामवच्छेदकत्वकल्पनायास्तेषामधिष्ठानत्वकल्पनायाः साम्येऽपि तेषां निमित्तकारणत्वस्यापि कल्पने भवत एव गौरवादिति चेत्;

उच्यते । अनन्तकोटीन्द्रियाणां तत्प्रागभावानां तद्ध्वंसानां तदुत्पत्तीनां तत्कार्यकारणभावानां तत्तदत्यन्ताभावानां तत्प्रतियोगिकानुयोगिकभेदानां तेषामनन्ताधिकरणवृत्तित्वानां च कल्पनामपेक्ष्य क्लृप्तस्यैकस्यैव नभसश्श्रोत्रेन्द्रियत्वकल्पनाया एव लाघवेन उचितत्वात् ॥

इत्थं च कारणत्वेन क्लृप्तस्य तस्यैवाकाशस्य समवायित्वकल्पनं युक्तम् । अन्यथा अनन्तानां भेर्यादीनां शब्दसमवायित्वकल्पने अतिगौरवात् । भेर्यादिशब्दप्रत्यक्षाभावप्रसङ्गाच्च । कर्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रेन्द्रियत्वेन तदवच्छेदेन भेर्यादिशब्दाद्यभावेन सन्निकर्षाभावात् । कर्णशष्कुल्यवच्छिन्नोत्पन्नशब्दस्यैव सन्निकृष्टत्वात् । अन्यथा अतिप्रसङ्गादिति सर्वं सुन्दरम् ॥

स च शब्दस्त्रिविधः । संयोगजः विभागजः शब्दजश्चेति । भेरीदण्डसंयोगजः संयोगजः । एवं वंशपाटने पटपटादिशब्दो विभागजः । द्वितीयादिशब्दाः सर्वे शब्दजाः । तत्र कारणविभागस्त्वग्रे वक्ष्यते । परिमाणं च तत्र परममहत् । अपरिच्छिन्नपरिमाणवानित्यर्थः । तदपि नित्यमेव । शेषं पूर्ववत् ॥

शब्दादयो गुणाः षट् च राजन्ते वियति ध्रुवम् ।
श्रोत्रेन्द्रियं तदेवैवं शब्दाधारं तथैव च[1] ॥

दिक्कालनिरूपणम्

कालदिशावप्येके[2] । ते च नित्ये । विभ्व्यौ च । एके अपि ते तपनपरिस्पन्दाद्युपाधिसंभेदात् उदयास्तगिरितपनसंयोगाद्युपाधिसंभेदाच्च प्राच्यादिसंज्ञतां लभेते । पुरुष इव वचनपठनादिक्रियोपाधिवशात् वाचकपाठकाद्युपाधिव्यपदेशवत् । ते सङ्ख्यादिपञ्चगुणवत्यौ ॥

अत्र दीधितिकृतः—दिक्कालयोर्मानाभावः । वर्तमानादिप्राच्यादिव्यवहाराणां चावश्यमभ्युपेयैरुपाधिभिरेवोपपत्तेः । अथ परत्वापरत्वासमवायिकारणसंयोगाश्रयत्वेन तयोः सिद्धिः । तथा हि—अस्ति बहुतरतपनपरिस्पन्दे स्थविरे अल्पतरतपनपरिस्पन्दे यूनि बहुतरसंयुक्तसंयोगदवीयोदेशस्थे अल्पतरसंयुक्तसंयोगनेदीयोदेशस्थे च परत्वापरत्वव्यवहारः सर्वानुभवसिद्धः । तथा च तन्नियामकत्वेन सिद्धयोर्द्विविधयोः परत्वापरत्वयोः समवायिकारणं पिण्डः, असमवायिकारणं कालसंयोगः दिक्संयोगश्च । कालाद्युपाधेः तपनपरिस्पन्दरूपत्वेन पिण्डसंयोगाभावात् । समवायिकारणप्रत्यासन्नत्वाभावात्, वृद्ध व्यवहाराभावाच्चेति चेन्न । ईश्वरसंयोगस्यैवासमवायिकाणत्वाभ्युपगमात् । दैशिकयोः परत्वापरत्वयोश्च तत्तद्देशपिण्डसंयोगस्यैवासमवायिकारणत्वसंभवेन तदतिरिक्तकालदिशोः शशशृङ्गायमाणत्वात् । श्रुतिस्मृतिपुराणादौ ईश्वर एव बहुशः कालशब्दप्रयोगाच्चेति प्राहुः ॥

सङ्ख्यादयो गुणाः पञ्च दिशि काले व्यवस्थिताः ।
शिरोमणिस्तयोर्मानं नास्तीत्याह विचक्षणः ॥

1 A reads तदेव च ।
2 A reads प्येवं नित्ये ।

आत्मनिरूपणम्

आत्मा नित्यो विभुश्च । स च द्विविधः । जीवेश्वरभेदात् । [तत्र ईश्वरः एक एव] जीवास्त्वनन्ताः ॥

अत्र केचित्—शरीरातिरिक्तात्मसद्भावे मानाभावः । अत एव 'स्थूलोऽहं' 'गौरोऽहम्' इत्यादिप्रतीतिरपि संगच्छते । न चेयं भ्रान्तिः, बाधकाभावात् । अत एव ब्राह्मणो विद्वान्, राजा सुखी, युवा रागी, कुलालो घटकर्ता, इत्यादिव्यवहारा अपि सङ्गच्छन्ते । अन्यथा ब्राह्मण्यादेश्च शरीरधर्मत्वात् ज्ञानादेश्च शरीराधर्मत्वात्तद्वतोरभेदव्यवहारानुपपत्तेः । प्राणादिरूपसहकार्यभावेन इन्द्रियाणां नष्टत्वेन च मृतशरीरस्याज्ञातृत्वोपपत्तेः । भूताद्यावेशस्त्वसिद्ध एव । ज्वरादिरोगविशेषेणैव विकलत्वाद्युपपत्तेः । अत एव ईश्वरे परलोके च मानाभावः । सुखदुःखयोरेव स्वर्गनरकादिपदवाच्यत्वात् । पञ्चत्वस्यापवर्गपदार्थत्वात् । सुखदुःखादिवैचित्र्यस्य सेव्यसेवकभावस्य नरवानरसूकरकेसरिमयूरादिविचित्रयोनिसम्बन्धस्य च स्वभावादेवोपपत्तेः । तथैव संसारस्वभावात् । 'मम शरीर'मित्यादेरपि घटस्वरूपमित्यादिवदुपपत्तेरिति वदन्ति ॥

तत्तुच्छम् । प्राणशरीरेन्द्रियाणामचेतनत्वेन तदतिरिक्तचेतनं विना विद्वदादिव्यवहारानुपपत्तेः । न च प्रत्येकं तेषां अचेतनत्वेऽपि सहकारिलाभात् शरीरस्य चैतन्यं नानुपपन्नं, अन्यथा तवाऽपि सुषुप्तौ ज्ञानोत्पत्तिप्रसङ्गादिति वाच्यम् । विनिगमनाविरहेण प्राणेन्द्रियशरीराणांचैतन्यकल्पनामपेक्ष्य एकस्यैव चेतनस्यात्मनः कल्पनाया लघुत्वात् । न च प्राणानामिन्द्रियाणां चानेकत्वाच्छरीरस्य चैतन्यकल्पने लाघवमेव विनिगमकमस्तीति वाच्यम् । एवमपि तत्तदिन्द्रियं तत्तत्प्राणादिकमादाय विनिगमनाविरहस्य वज्रलेपायमानत्वात् । नचातिरिक्तचेतनकल्पनेऽपि तैर्विनिगमनाविरह इति वाच्यम् । धर्मिग्राहकप्रमाणेन तस्य चेतनत्वेनैव सिद्धेः । किं च किमिदं स्वभावत्वं प्राणित्वं वा नरत्वं वा तत्तद्व्यक्तित्वं वा स्वजन्यत्वं

वा, नाद्यौ, अतिप्रसङ्गतादवस्थ्यात् । न तृतीयः, अननुगमात् । न तुरीयः, असिद्धेः । तस्माद्विचित्रसुखदुःखाश्रयः शरीराद्यतिरिक्तः चेतनस्सिद्धः । एवमपि कथं सुखदुःखादिवैचित्र्यमितिचेत् तस्य नित्यत्वेन जन्मान्तरकर्मविपाकादेवेति ॥

गौरोऽहमित्यादिप्रत्ययस्तु भ्रमः । अत एव विशेषदर्शना' न्ममशरीरमि ' त्यादिव्यवहारः । ब्राह्मणो विद्वानित्यादेश्च ब्राह्मणशरीरावच्छिन्नात्मा विद्वानित्यर्थत्वान्न विरोध इति ॥

अन्ये तु शरीरं न चेतनं कृलिमपुलिकादिविचित्रचित्रगालादौ तदभावात् । नापि प्राणाः । बहिर्गतप्राणादौ तदभावात । नापि विशिष्टम् । फूत्कारादिपूरितकृत्रिमपुत्रिकादौ तदभावात् । किन्त्विन्द्रियं । अत एव " काणोऽहं " " मूकोऽहं " " बधिरोऽहं " इत्यादिव्यवहारास्संगच्छन्ते इत्याहुः ॥

तदपि न, इन्द्रियाणामप्यनेकत्वेन विनिगमनाविरहात् । किं च चक्षुर्न चेतनं, अन्धस्य चैतन्याभावप्रसङ्गात् । नापि श्रोत्रं, बधिरस्य तदभावप्रसङ्गात् । नाऽपि रसना, तस्याः रसतत्समवेतमात्रग्राहकत्वेनानुभवसिद्धत्वात् , तदतिरिक्तज्ञानाद्यभावप्रसङ्गात् । रसनेन्द्रियस्य रसनामात्रवृत्तित्वेन करकुचसंयोगे कामविकारो न स्यात् । तस्य सर्वशरीरव्यापकत्वे तत्राऽपि रसोपलब्धिप्रसङ्गात् । अत एव न घ्राणेन्द्रियम् । तस्यापि प्रतिनियतगुणग्राहकत्वात् । च्छिन्ननासस्य छिन्नरसनस्य च तदभावप्रसङ्गात् । नाऽपि त्वगिन्द्रियम् । कुष्ठ्यादेश्चैतन्याभावप्रसङ्गात् ॥

अन्ये तु प्राणाद्यन्वयव्यतिरेकानुविधानेनैव ज्ञानादेरनुभूयमानत्वेन प्राण एव चेतनः । नचोक्तदोषप्रसङ्गः । शरीरेन्द्रियसहकारेणैव ज्ञानाद्युत्पत्तिस्स्वीकारात् । कृलिमपुत्रिकादौ चेन्द्रियाभावात् । अत एव प्राणसंयोगवियोगाभ्यां जीवत्त्वपञ्चत्वव्यवहारावपि संगच्छेते इत्याहुः ॥

तदपि न सुन्दरम् । प्राणादीनामप्यनन्तत्वेन तदयोगात् । सुषुप्तावपि प्राणशरीरेन्द्रियाणां तत्संबद्धानाञ्च सत्वेन तदानीमपि ज्ञानाद्युत्पत्तिप्रसङ्गाच्च । न च शरीरमनोयोगाभावात् त्वङ्मनोयोगाभावाच्च न तदा ज्ञानाद्युत्पत्तिरिति वाच्यम् । एवमपि पूर्वदोषानुद्धारात् ॥

इतरे तु मन एवात्मा, अनेन विना ज्ञानादीनामभावात् । तस्यापि नित्यत्वेन त्वदुक्तरीत्या सुखादिवैचित्र्याणामुपपत्तेरिति वदन्ति ॥

तदपि न रहस्यम् । धर्मिग्राहकप्रमाणेन मनसोऽणुत्वेनैव सिद्धत्वात् 'अहं सुखी 'त्यादिप्रत्यक्षाभावप्रसङ्गात् । अणुत्वञ्च तस्याग्रे साधयिष्यामः । एतेन जीवोऽणुरिति वैष्णवानां मतमपास्तम् ॥

परिच्छिन्नपरिमाणवान् जीवः प्रदीपप्रभावत् सङ्कोचविकासशालीति नवीनवैष्णवानां मतमप्यतितुच्छम् । जीवस्य दीपप्रभावत् संकोचविकासशालित्वे सावयवत्वेनाऽनित्यत्वप्रसङ्गात् । जन्यभावस्य विनाशित्वनियमात् । अन्यथा पटादेरपि नित्यत्वप्रसङ्गात् । मनस एव तथात्वस्वीकारेण वक्ष्यमाणसर्वानुपपत्त्युद्धारणसम्भवेन तेनैव सर्वसामञ्जस्ये जीवासिद्धिप्रसङ्गाच्च । तस्मात् पारिशेष्याच्छरीरेन्द्रियप्राणमनोभिन्नो विभुर्जीवः सिद्धः ॥

किं च काश्मीरनेपाळाद्युत्पन्नकुङ्कुमकस्तूरीचामरादीनां कर्णाटक चक्रवर्तिभोगहेतुत्वेन तेषां तददृष्टजननावश्यकत्वात् । जीवस्य वैभवाभावे च तददृष्टस्य कार्यदेशे अवर्तमानत्वेन व्यधिकरणत्वात् कारणत्वासंभवात् जीवस्य वैभवसिद्धिः । इत्थं च स्वाश्रयसंयोगसंबन्धेन कार्यदेशे तददृष्टस्य विद्यमानत्वात् समानाधिकरणत्वाच्च कारणत्वमप्यविरुद्धम् । नचैवं तेन सम्बन्धेन तदीयादृष्टस्य सर्वत्र सत्वात् सर्वस्याऽपि तद्भोगहेतुत्वप्रसङ्ग इति वाच्यम् । अरण्यस्थदण्डवत् कारणातिप्रसङ्गस्य अदोषत्वात् । न च सर्वेषामेव पदार्थानां सर्वोपभोगहेतुत्वप्रसङ्ग इतिवाच्यम् । विशेषसामग्रीविरहादेव नियमोपपत्तेः ॥

सुखादिवैचित्र्यादेव जीवः प्रतिशरीरं भिन्नः[1] नित्यश्च । स च सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नभावनादिचतुर्दशगुणवान् । तत्र सङ्ख्यादिपञ्चकं पूर्ववत् । बुध्यादयः सर्वे अनित्याः । बुध्यादयः षडव्याप्यवृत्तयः । तत्र घटाद्यवच्छेदेन ज्ञानेच्छाद्वेषाणामनुत्पत्त्या तेषामव्याप्यवृत्तित्वम् । सुखदुःखप्रयत्नानाञ्च पादे मे सुखं शिरसि मे वेदनेत्याद्यनुभवेन अव्याप्यवृत्तित्वम् ; चेष्टासामान्यं प्रत्यन्वयव्यतिरेकाभ्यां प्रयत्नसामान्यस्य कारणत्वावधारणात्, विलक्षणचेष्टां प्रति विलक्षणप्रयत्नस्य हेतुत्वमवधार्यते । यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषस्याऽपि तद्विशेषप्रयोजकत्वमिति [2]न्यायात् । शरीरेऽपि किञ्चिदवयवावच्छेदेन तदुत्पादात् सुतरामव्याप्यवृत्तित्वम् । धर्मादयस्तु व्याप्यवृत्तयः । अत एव शरीरविगमेऽपि तेषामवस्थानम् । अन्यथा स्वर्गनरकजन्मान्तराद्यनुत्पादप्रसङ्गात् । जातमात्रस्य शिशोः स्तन्यपानप्रवृत्त्यनुकूलेष्टसाधनताज्ञानाद्यनुत्पत्तिप्रसङ्गाच्च । तत्र बुद्ध्यादयः द्विक्षणमात्रावस्थायिनः, चतुर्थादिक्षणेषु तेषामननुभवात् । धर्मादयश्च चिरस्थायिनः कालान्तरे फलदर्शनात् ॥

ईश्वरनिरूपणम्

ईश्वरोऽप्येको नित्यो विभुः अशरीरश्च । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धीच्छाप्रयत्नाष्टगुणवान् । तत्र सङ्ख्यादयः पञ्च पूर्ववत् । बुध्यादयस्तु नित्याः । व्याप्यवृत्तयश्च । धर्मिग्राहकप्रमाणेन तेषामेकत्वेन तथैव सिद्धेः । ईश्वरबुध्यादयः कार्यसामान्यकारणानि ॥

ननु ईश्वरसद्भावे मानाभावः । कार्यवैचित्र्याणां कर्मवैचित्र्यादेवोपपत्तेः । भूपर्वतसागरपाषणाङ्कुराद्युत्पत्तीनामपि प्राण्यदृष्टविशेषादेवोपपन्नत्वात् मयूरादिविचित्रकर्तृत्वमपि अदृष्टद्वारा तस्यैवोपपन्नम् । न च प्रथमं

1 A adds विभुः ।

2 A reads नियमान् ।

मयूरादेर्भाविविचित्रज्ञानाभावेन तत्कर्तृत्वमनुपपन्नमिति वाच्यम् । भाविघटादिज्ञानाभावेन कुलालादेरपि घटकर्तृत्वासम्भवात् । तज्जातीयज्ञानमस्तीति यदि, तर्हि प्रकृतेऽपि तुल्यम् । किं च नान्तरीयकतण्डुलमध्यवर्त्तिसूरणामलकादि पाके तज्ज्ञानाभावेऽपि तत्कर्तृत्वदर्शनात् तज्ज्ञानाभावेऽपि तत्कर्तृत्वं नानुपपन्नम् ॥

तत्र मत्तो भूतं न तु मया कृतमित्यनुभवात, तत्पाकस्य तज्जन्यत्वेऽपि न तस्य कर्तृत्वमिति चेत् ॥

मैवम् । मादृशानामेतत्कर्तृत्वाभावेऽपि अदृष्टद्वारा भूभूधरवीरुत्सागराङ्कुरमयूरादीनामपि अस्मदादिजन्यत्वसम्भवात, ईश्वरस्य गगनकुसुमायमानत्वात् । न च कार्यं सकर्तृकमिति नियमात् भूरुहादौ मादृशानां कर्तृत्वासंभवात ईश्वरः कर्ता सिध्यतीति वाच्यम् । कार्यं शरीरिकर्तृकं इत्यपि नियमस्य घटादाववधारणात् ईश्वरस्यापि शरीरसिद्धिप्रसङ्गात । नचेष्टापत्तिः । अपसिद्धान्तात् ईश्वरत्वभङ्गप्रसङ्गाच्च । तस्य परिच्छिन्नत्वे युगपन्नानादेशोत्पन्नाङ्कुरादिषु कर्तृत्वानुपपत्तेः । न च तस्य सर्वज्ञत्वात सर्वशक्तित्वाच्च कायव्यूहस्वीकारेण सर्वमुपपन्नमिति वाच्यम् । कायव्यूहे मानाभावात । न च सौभर्यादौ तथा श्रवणात् पुराणं प्रमाणमिति वाच्यम् । तथाविधगाथायां श्रद्धामात्रेण तथात्वाभिमानात् । अन्यथा भूमिकाधारकल्पनाभागानामपि तथात्वापातात ॥

किञ्च चेतनाधिष्ठितशरीरस्य मलमूत्रभ्रमप्रमादविप्रलिप्साकरणापाटवदोषचतुष्टयकामक्रोधमोहमदमात्सर्यारिषड्वर्गसंबन्धनियमात । अत एव त्वयापि रामकृष्णादिशरीरे सर्वं स्वीक्रियते । एवञ्च शरीरस्वीकारे ईश्वरस्य सर्वदोषप्रसक्तौ ईश्वरत्वं भज्येत । केनापि कुत्रापि अदृष्टनिर्दुष्टदिव्याविकारिशरीरस्य शशशृङ्गायमानत्वात । दृष्टानुसारत्वात् कल्पनायाः । अन्यथा अप्रामाणिकानन्तपदार्थकल्पनाप्रसङ्गात । अपि च तस्य शरीरं सावयवं

निरवयवं वा ? नान्त्यः, तस्य शरीरत्वभङ्गप्रसङ्गात् भोगायतनत्वचेष्टाश्रयत्वयोर-भावात् । अन्यथा ईश्वरस्यापि नित्यसुखदुःखादिविकारप्रसङ्गात् । सर्वत्र-कार्योपलम्भेन विभुत्वस्वीकारेण चेष्टानुपपत्तेः । नाद्यः, विनाशित्वप्रसङ्गात् । तस्मात्तस्य शरीरित्वकल्पनमप्यसत्कल्पनमिति चेत् । अत्राहुः । घटादिरूप-कार्यस्य साक्षात्कृतिजन्यत्वावधारणात्, भूरुहादेरपि कार्यत्वात् तस्यापि साक्षात् कृतिजन्यत्वकल्पनात्, दृष्टानुसारित्वात् कल्पनायाः । यद्विशेषयोः कार्यकारणभावः बाधकं विना तत्सामान्ययोरपीति न्यायात् । इत्थञ्च अस्मदादि कृतीनां तत्र कारणत्वासम्भवात् अस्मदादिकृतिभिन्ना कृतिस्सिद्धा । सा च गुणत्वात् गुणिनमन्तरेणानुपपद्यमाना स्वाश्रयं गुणिनमनुमापयति । तस्याश्च नास्मदादिराश्रयः । अनुपलम्भात् । विनिगमनाभावात् बाधकानुपपत्तितादव-स्थ्याच्च तदाश्रयः अस्मदादिभिन्नस्सिद्ध एव ईश्वरः । एवं घटेच्छाशून्येन घटाद्यजननात् अन्वयव्यतिरेकाभ्यां इच्छाया अपि तत्र कारणत्वावधारणात उक्तन्यायेन अस्मदादीच्छातिरिक्तेच्छाया भूरुहादिकारणत्वेन सिद्धौ तदाश्रयो-ऽस्मदादिभिन्न उक्तन्यायेन स एव, लाघवात् ॥

एवं कपालादिप्रत्यक्षाभावे घटाद्यनुत्पत्तेः उपादानप्रत्यक्षमपि तत्र कारणम् । तथा च अस्मदादीनामङ्कुराद्युपादानप्रत्यक्षासम्भवात उक्त-युक्त्या अस्मदादिप्रत्यक्षभिन्नं अङ्कुराद्युपादानगोचरप्रत्यक्षं तदाश्रयोप्युक्त-युक्त्या स एव, लाघवात । कृतिरिच्छा ज्ञानञ्च नित्यं, प्रत्येकमेकं लाघवात् । न च शरीरकल्पनम् । कृत्यादिकं विना शरीरस्य जनकत्वासंभवात् कृत्यादि-कमेव सर्वत्र कारणम् । न तु शरीरमपि, गौरवात् । तथा च तस्य क्वचित् साक्षात्कारणत्वबाधेन शरीरद्वारा कल्प्यते । ईश्वरस्य तु शक्तत्वात् सर्वविषय-कत्वाच्च स्वत एव जनकत्वसंभवेन जगदीश्वरस्य शरीरकल्पनमप्रामाणिकमेव ॥

<u>दीधितिकृतस्तु</u> सहस्रतन्तुकपटे एकतन्तुविगमेन नष्टे एकोनसह-स्रतन्तुकपटस्यानुभूयमानत्वेन तस्य सहस्रतन्तुकपटभिन्नत्वेन तत्र कुविन्दस्य कर्तृत्वासंभवात् ईश्वर एव कर्ता सिध्यतीति प्राहुः । 'ब्राह्मणोस्य मुख-मासीत्' (पु. सू.) इत्यादिश्रवणं तु स्वेच्छाकल्पितशरीराभिप्रायेण न तु

वास्तवं शरीरमस्ति । 'अपाणिपाद' (श्वे-३-१२) इत्यादिश्रवणात् । एवञ्च ईश्वरस्य शरीरकल्पनं लोककल्पनं चासत्कल्पनमिति सर्वमवदातम् ॥

द्विधा चात्मा जीवस्सकलजगतामीश इतरः
द्विसप्त द्योतन्ते प्रथम इह सङ्ख्यादिकगुणः ।
महेशे भासन्ते कृतिमतिमुखाश्शोभनतमाः
गुणाह्यष्टौ ज्ञेया विमलमतिभिर्युक्तिभिरमी ॥

मनश्च प्राणिसमसङ्ख्यं अनन्तम् । तच्च सङ्ख्यापरिमाणपृथक्त्वसंयोगविभाग-परत्वाऽपरत्ववेगाष्टगुणवत् । सर्वं पूर्ववत् । तच्च सुखाद्युपलब्धिसाधनम् । तदप्यणुपरिमाणम् । तच्च विभ्विति मीमांसकाः ॥

ननु मनस्सद्भावे मानाभावः । न च सुखाद्युपलब्धयः करणसाध्याः क्रियात्वात् छिदिक्रियावत्, इत्यनुमानेन सुखाद्युपलब्धिकारणसिद्धौ चक्षु-रादीनाञ्च तत्कारणत्वासंभवात्, तत्कारणमन्तः करणं सिध्यतीति वाच्यम् । आवश्यकादृष्टविशेषस्यैव तत्कारणत्वाभ्युपगमात इति चेन्न । अदृष्टविशेषेण इतरस्यान्यथासिद्ध्यङ्गीकारे इन्द्रियान्तराणामपि विलयप्रसङ्गात् कल्पनामात्रो-च्छेदप्रसङ्गाच्चेति मणिकृतः । व्यासङ्गानुपपत्तिर्मनसो लिङ्गमिति सूत्रम् । तस्यायं निगर्वः । व्यासङ्गदशायां चक्षुरादिसंयोगादौ सत्यपि ज्ञानानुत्पादस्य सर्वानुभवसिद्धत्वात् । इत्थञ्च तद्दशापन्नचक्षुः उपधायकत्वघटककिञ्चिद्द्रव्य संयोगशून्यम् । तदितरचाक्षुषसकलकारणे सत्यपि तदानीं चाक्षुषाजनकत्वात्, चक्षुरसंयुक्तघटादिवत् । एवञ्च तद्विघटकाभावप्रतियोगि यद्द्रव्यं तदेव मनः । न चादृष्टविशेषवैकल्याद्व्यासङ्गोपपत्तिः । अदृष्टविशेषस्य तदानीमपि विद्यमान-त्वात् । व्यासङ्गस्य अन्यथा अनिर्वचनाच्च । निरवच्छिन्नमनस्संयोग-शून्येन्द्रियत्वस्य व्यासङ्गपदार्थत्वात् ॥

एतेन विभु मन इति मीमांसकमतमपास्तम् । तस्य संयोगस्य सर्वदा सत्त्वेन व्यासङ्गानुपपत्तेः । विभुद्वयसंयोगाभावेन सुखाद्यनुपलब्धि-

प्रसङ्गात् । प्रत्यासन्नेन्द्रियस्य कारणत्वात् । अजसंयोगाभावात् । न च दीर्घशष्कुलीं भक्षयतः पुंसः सर्वेन्द्रियजन्यज्ञानयौगपद्यस्य सर्वानुभवसिद्धस्य अपलापप्रसङ्गादिति[ङ्ग इति] वाच्यम् । तत्र यौगपद्यस्य भ्रमविषयत्वात् । बाधकस्य च निवेदितत्वात् ॥

यत्तु मध्यमपरिमाणवत् संकोचविकासशालि मनः । तेन व्यासङ्गयौगपद्ययोरप्युपपत्तेरिति वदन्ति[1] । तत्तुच्छम् । एकस्यैवानन्तान्तःकरणतदुत्पत्तिविनाशतत्कार्यकारणभावतत्प्रतियोगिकानुयोगिकभेदकल्पने गौरवात् । इत्थञ्च सर्वोपलब्धिसाधनं मन इति स्फुटमिति सर्वमवदातम् ॥

सङ्ख्यादयो गुणा ह्यष्टौ भासन्ते मनसि स्फुटम् ।
एवं नवैव द्रव्याणि प्रपञ्चे भान्ति नित्यशः ॥

रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नवेगाः प्रत्यक्षाः । गुरुत्वधर्माधर्मस्थितस्थापकभावना अतीन्द्रियाः । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वद्रवत्वानि चक्षुःस्पर्शनद्वीन्द्रियग्राह्याणि । स्नेहश्च त्वगिन्द्रियमात्रग्राह्यः । शब्दः श्रोत्रेन्द्रियमात्रग्राह्यः । बुध्यादयः षट् मनोमात्रवेद्याः । आत्मैकत्वपरिमाणयोः मनसा ग्रहणात् सङ्ख्यापरिमाणयोः मनोमात्रग्राह्यत्वमिति केचित् । अन्ये तु परिमाणाऽविषयकद्रव्यविषयकप्रत्यक्षाभावादात्मविषयकप्रत्यक्षान्यथानुपपत्त्या परिमाणस्य मानसत्वेपि सङ्ख्याया मानसत्वे मानाभाव इति वदन्ति । वेगश्चक्षुस्त्वगिन्द्रियवेद्यः । इत्थञ्च तेषु प्रमाणं प्रत्यक्षमेव । चित्ररूपसद्भा चित्रः पटः चित्रं रूपमित्यादिप्रत्यक्षमेव प्रमाणम् ॥

अत्र दीधितिकृतः । चित्ररूपे मानाभावः । अव्याप्यवृत्तिसमानाधिकरणनानारूपविषयत्वेनैव तादृशप्रत्यक्षोपपत्तेः । अत एव प्रान्ते रक्तो मध्ये धवळः पटः इत्यादिव्यवहारोऽपि सङ्गच्छते । अत एव

1 वेदान्तिनः ।

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥

इत्यादिस्मरणमपि सङ्गच्छते । अत एव पञ्चवर्णः पारावतः त्रिश्वेता सल्लकीत्यादिव्यवहारावपि संगच्छेते । अत एव,

भद्रा शोलेषु तुङ्गा प्रभुलकुचयुगे नेलयुग्मे च कृष्णा
शोणा बिम्बाधरेऽस्मिन् शुभवचसि सा नर्मदा तापनीया ।
विश्लेषे चन्द्रभागा महितगळतले गोमती सर्वगात्रे
गाम्भीरा नाभिदेशे सरिदखिलतनुर्भाति गोदाकटाक्षे ॥

इत्यादिसाहित्यप्रयोगा अपि सङ्गच्छन्ते । न च सविषया [1]वृत्ति व्याप्यवृत्ति[वृत्ति] जातेरव्याप्यवृत्तिवृत्तित्वाभावनियमात् व्याप्यवृत्ति रूपम् । अन्यथा निरुक्तव्याप्तिविरोधेन रूपत्वस्य जातित्वाभावप्रसङ्गादिति वाच्यम् ॥

अप्रयोजकत्वात् । अन्यथा सविषयावृत्तीति विशेषणं परित्यज्य व्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तित्वाभावनियमस्वीकारे ज्ञानत्वादेरपि तथाभाव-प्रसङ्गादित्याहुः ॥

तच्चिन्त्यम् । एकलैव पटे अनन्तरूपतत्प्रागभावतद्ध्वंसतत्कार्यकारण भावतत्प्रतियोगिकानुयोगिकभेदतावदधिकरणवृत्तित्वानाञ्च कल्पनापेक्षया तत्र एकस्यैव चित्ररूपस्य कल्पनायाः लघुत्वादुचितत्वात् । किं च चित्रः पटः चित्रं रूपमित्यादिव्यवहारादीनां समानाधिकरणनानारूपविषयकत्वोपपत्तौ एकस्मिन्नेव सुवर्णदुर्वर्णादौ क्रमेण बहूनां रूपाणां जायमानत्वेन तत्रापि चित्रप्रत्यक्षव्यवहार इति [त्यति] प्रसङ्गात् ॥

1 ज्ञानत्वादौ व्यभिचारपरिहाराय—सविषयावृत्तीति । संयोगत्वादौ तद्वारणाय—व्याप्यवृत्तिवृत्तीति ।

न च समानाधिकरण[समानकालीन]नानारूपविषयत्वं तस्येति नोक्तदोष इति वाच्यम् । बहूनां रूपाणामपि चित्रप्रत्ययव्यवहारविषयत्वस्य नियामकत्वस्य च कल्पनापेक्षया एकस्यैव चित्ररूपस्य तद्विषयत्वस्यतन्नियामकत्वस्य च कल्पनायाः लघुत्वात् । नचोदाहृतस्मरणविरोधः । तस्य वर्णाभिन्नलौहित्यवान् मुखपुच्छावच्छिन्नपाण्डरवान् खुरविषाणावच्छिन्नश्वेतरूपवान् यः सः नीलो वृष इत्यर्थात् । एतेन त्रिश्वेता सल्लकीत्यादिकं व्याख्यातम् ॥

गन्धो रसश्च न चित्रः । न चाव्याप्यवृत्तिः । मानाभावात् । ननु रसोऽव्याप्यवृत्तिः । "मूले तिक्ता अन्तराम्ला अधो मधुरा कर्कटकी षड्रसा हरीतकी"

ताम्बूलं कटुतिक्तमुष्णमधुरं क्षारं कषायान्वितं
वातघ्नं क्रमिनाशनं कफहरं कायाग्निसन्दीपनम् ।
स्त्रीसंभाषणभूषणं सुरुचिरं शोकस्य विच्छेदनं
ताम्बुले विहितास्त्रयोदश गुणाः स्वर्गेऽपि ते दुर्लभाः ॥

इत्यादयोऽपि सङ्गच्छत इति चेन्न । गौरवस्य निवेदितत्वात् । न च षड्रसा हरीतकीत्यनुपपत्तिः । षड्रसावयवका हरीतकीत्यर्थात् । तादृशप्रत्यक्षादेश्च अवयवरसविषयकत्वात् । अन्त्यावयवी नीरस एव ॥

नन्वेवं चित्रपटादिरपि नीरूपः स्यात्; द्रव्यचाक्षुषस्य रूपविषयत्वनियमोऽपि अवयवरूपविषयकत्वेनैवोपपन्नः, द्रव्यचाक्षुषं प्रति उद्भूतरूपं कारणमिति कार्यकारणभावोऽपि अवयवरूपेणैव निर्व्यूह्य इति चेन्न । सम्बन्धभेदेन कार्यकारणभावस्य भिन्नत्वात् । चित्रस्थले तु रूपस्य स्वसमवायिसमवेतत्वसम्बन्धेन कारणत्वम् । अन्यत्र च समवायसम्बन्धेन तथात्वमिति नानाकार्यकारणभावप्रसङ्गात् । कारणताघटकसम्बन्धे गौरवाच्च । गन्धरसयोस्तु द्रव्यप्रत्यक्षाऽनुपयोगित्वेन अनुपपत्त्यभावात् । एवं द्रव्यस्पार्शनप्रत्यक्षे

स्पर्शस्याऽपि कारणत्वात् उक्तयुक्त्या स्पर्शोऽपि चित्रोऽङ्गीक्रियते । न च अवयविरसे अवयवरसस्य कारणत्वादवयवानाञ्च रसवत्वाद्धरीतक्यादौ कथं न रसस्योत्पत्तिः । सामग्रीसत्वे कार्योत्पादस्य ब्रह्मणाऽपि निवारयितुमशक्यत्वादिति वाच्यम् । एकजातीयरसं प्रति विजातीयरसस्य प्रतिबन्धकत्वात् । इत्थञ्च हरीतक्यादिषु परस्परविरोधेन न कस्याऽपि रसस्योत्पत्तिः । अत एव विचित्रपटे नीलपीताद्यनुत्पत्त्या नीलपीतादि[वि]लक्षणमेव चित्ररूपमुत्पद्यत इति स्वीक्रियते । अत एव सुकुमारासुकुमारस्पर्शद्वयवदवयवारब्धे अवयविनि चित्रस्पर्शश्च स्वीक्रियते । अधिकं चास्मत्कृतलीलावतीरहस्ये अनुसन्धेयमिति संक्षेपः ॥

एतेन गुरुत्वकार्यस्य पतनादेरपि प्रत्यक्षसिद्धरसेनैवोपपत्तौ गुरुत्वे मानाभाव इति प्रत्याख्यातम् । नीरसस्याऽपि निवेदितत्वेन तत्पतनाभावप्रसङ्गात् । एवं च द्रवत्वकार्यस्य स्यन्दनादेरपि स्नेहेनैवोपपत्तौ द्रवत्वगुणे मानाभाव इत्यपि न, स्नेहकार्यसंग्रहस्याऽपि द्रवत्वेनैवोपपत्तौ स्नेह एव मानाभाव इत्यपि तुल्यत्वात् । तस्माद्विनिगमनाविरहादुभयोरपि सिद्धिः । किञ्च स्नेहस्य जलासाधारणगुणत्वेन तेजः पृथिवीव्यावृत्तत्वात् सुवर्णदुर्वणलाक्षाजतुप्रभृतिषु स्यन्दनाभावप्रसङ्गात् ॥

वस्तुतस्तु स्नेहत्वस्य त्वगिन्द्रियमात्रवेद्यत्वात् द्रवत्वस्य च चक्षुषापि वेद्यत्वात् एकेनान्यस्यापि सिध्यसम्भवात् ॥

अथ शब्दनिरूपणम्

शब्दश्च ध्वन्यात्मको वर्णात्मकश्च । ध्वन्यात्मकोऽपि द्विविधः । वर्णसंबन्धस्तद्विरुद्धश्च । आद्यः वीणादिध्वनिः । भेर्यादिध्वनिः वर्णविरुद्धः । अत्र द्वितीयादिशब्दजशब्दोत्पत्तिश्च वीचीतरङ्गन्यायेन कदम्बमुकुळन्यायेन वा व्यवस्थितः । वर्णात्मकशब्दानां च ताल्वोष्ठपुटव्यापारजन्यत्वनियमः । अत एव वीणादौ वर्णविशेषसम्बन्धध्वनिजातीयध्वनिविशेषेण वर्णा अनुमीयन्ते । अत एव यत्र रागे बहूनि पदानि तत्र वीणादौ किं पदमिदानीं गीयमानं तेष्विति सन्देहोऽप्यनुभवसिद्ध उपपद्यते ॥

अत्र भट्टाचार्याः । शब्दो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वात् घटवत् । न च गन्धादौ व्यभिचारः । आश्रयाघटितसन्निकर्षेण प्रतीयमानत्वादिति हेत्वर्थात्[1] । न च सावयवत्वमुपाधिः । व्यणुके साध्याव्यापकत्वात् । उभयमतेऽपि गगनादौ साध्याव्यापकत्वात् । न च शब्दो न द्रव्यं श्रोत्रग्राह्यत्वात् शब्दत्वादिवदिति प्रतिरोधः । आश्रयस्य निरस्पर्शत्वादेरुपाधित्वात् । नचाप्रयोजकता । निरुपाधिकसाहचर्यस्यैवानुकूलतर्कत्वात् अन्यथा निरुपाधिकसाहचर्यमात्रप्रवृत्तानामभेदानुमानतद्रूपतद्द्रव्यत्वपृथिवीत्वाद्यनुमानानामपि लोपप्रसङ्गात् । किञ्च किं महान् कोलाहलः । 'एकः शब्दः' 'पृथक्शब्दा' इत्यादि प्रतीत्याऽगुणत्वात् द्रव्यत्वं शब्दस्य निर्विघ्नमित्याहुः ॥

तच्चिन्त्यम् । सावयवत्वनिरवयवत्वविकल्पग्रासात् । सावयवत्वे अनन्तावयवतदुत्पत्तिध्वंसतत्कार्यकारणभावतदत्यन्ताभावतत्प्रतियोगिकतदनुयोगिकभेदादिकल्पने महद्गौरवम् । निरवयवत्वे च अणुत्वेऽप्रत्यक्षत्वप्रसङ्गात् । विभुत्वे च सर्वत्र शब्दोपलब्धिप्रसङ्गात् । श्रोत्रस्यापि गगनस्य विभुत्वेन विभुद्वयसंयोगाभावात् सन्निकर्षाभावेनाप्रत्यक्षत्वप्रसङ्गात् इति ॥

स च शब्दः द्विक्षणमात्रावस्थायी स्वाधिकरणक्षणोत्तरक्षणोत्पन्नशब्दस्यैव नाशकत्वात् । अन्त्यशब्दस्तु उपान्त्यशब्दनाशनाश्यः । अन्यथा नित्यत्वप्रसङ्गात । उपान्त्यशब्दस्य नाशकत्वे च अन्त्यशब्दस्य क्षणिकत्वप्रसङ्गात्; क्षणिकपदार्थानङ्गीकारात् । उपान्त्यशब्द एव वा अन्त्यशब्दनाशक इति टीकाकृतः । तन्मते तु अन्त्यशब्दः क्षणिक एव ॥

अत्र मीमांसकाः । शब्दस्तावन्नित्यः श्रोत्रग्राह्यत्वात् शब्दत्ववत् । अत एव 'सोऽयं गकार' इति प्रत्यभिज्ञाऽपि सङ्गच्छते । सर्वदा शब्दप्रत्यक्षाभावस्य वायुसंयोगविशेषरूपव्यञ्जकाभावादेवोपपत्तेः । 'इदानीं हट्टे कोलाहल उत्पन्नः' 'विनष्टः कोलाहल' इत्यादिप्रत्यक्षादिस्तु व्यञ्जकवायु-

1 गन्धस्य च संयुक्तसमवायः सन्निकर्षः आश्रयघटितः ।

संयोगोत्पत्तिविनाशविषयः । ताल्वोष्ठपुटव्यापारभेरीताडनतन्त्र्यभिघातादिरपि तद्व्यञ्जकवायुसंयोगोत्पादक एव । भेरीशब्दः घनशब्दः पशुशब्दः नरशब्दः इति विचित्रव्यवहारादिरपि व्यञ्जकविलक्षणवायुसंयोगनिबन्धनः । तेषां शब्दवृत्तित्वेन भानन्तु भ्रमः । एवं चैत्रीयत्वादिकमपि बोध्यम् । तेनैव वाद्यविशेषाद्यनुमानमपि बोध्यम् । न च वायुसंयोगस्य अतीन्द्रियत्वात् कथं तेषामन्यथासिद्धिरिति वाच्यम् । वायुगगनसंयोगस्यातीन्द्रियत्वेऽपि वायुकर्णशष्कुलीसंयोगस्य मम प्रत्यक्षत्वात् । मन्मते वायोः प्रत्यक्षत्वात् । तत्संयोगस्यैव विलक्षणत्वादिति प्राहुः ॥

अत्रेदं चिन्त्यम् । सर्वैश्च स्वरसतः प्रतीयमानानामपि उत्पत्तिविनाशानां व्यञ्जकोत्पत्तिविनाशनिबन्धनत्वे घटपटाद्युत्पत्तिविनाशानामपि तथात्वापत्तौ सर्वेषामपि नित्यत्वापत्त्या सत्कार्यवादापातात् । शब्दवृत्तित्वेनैवोत्पत्तिविनाशचैलीयत्वमैत्रीयत्वादीनां सर्वदा सर्वैःस्वरसत एव प्रतीयमानत्वेन तावन्तीनां प्रतीतीनां भ्रान्तित्वकल्पनायोगात् । स एवाऽयं गकार इति प्रत्यभिज्ञायाश्च सैवेयं दीपकलिकेतिवत् तज्जातीयत्वावगाहित्वेनाप्युपपत्तेः । अत एव शब्दविशेषेण वस्तुविशेषपुरुषविशेषानुमानमपि सयुक्तिकम्, कार्यस्य कारणानुमापकत्वमिति न्यायात् । अन्यथा अप्रयोजकत्वेन व्याप्त्यभावेन सर्वानुभवसिद्धानुमानभङ्गप्रसङ्गात् ॥

किञ्च शब्दप्रत्यक्षत्वापेक्षया शब्दत्वस्यैव लघुत्वात् तस्यैव वायुसंयोगजन्यतावच्छेदकत्वौचित्यात् । अपि च श्रुतौ "ऋचस्सामानि जज्ञिरे" (तै. आ ३-३६) इत्यादिना, प्रातिशाख्ये च 'अथ शब्दोत्पत्तिः' इत्यादिना, शब्दशास्त्रे "तुल्यास्यप्रयत्नंसवर्णम्" (१-१-९) इत्यादिना शब्दोत्पत्तेः प्रदर्शितत्वात् ॥

अनुमानञ्च, शब्दस्तावदनित्यः बहिरिन्द्रियग्राह्यगुणत्वात्, घटरूपादिवत् । निर्दुष्टपरमेश्वरप्रणीतत्वेनैव वेदस्य प्रामाण्योपपत्तौ न तत्प्रामाण्यसिद्ध्यर्थं शब्दनित्यतासिद्धिरिति सर्वं समीचीनम् ॥

बुद्धिश्च द्विविधा सविकल्पकनिर्विकल्पकभेदात् । सविकल्पकञ्च त्रिविधम् । विशिष्टसमूहालम्बनसमुच्चयभेदात् । तत्र समूहालम्बनं "इमे रसालतालतमालपनसा" इत्यनेकविशेष्यकज्ञानम् । समुच्चयज्ञानञ्च 'वृक्षः संयोगी तदभाववांश्चे'त्येकविशेष्यक प्रतियोगितदभावोभयगोचरम् । विशिष्टज्ञानञ्च द्विविधम् । विशिष्टज्ञानं विशिष्टवैशिष्ट्यज्ञानं चेति । तत्र विशिष्टज्ञानं घटघटत्वतत्सम्बन्धगोचरम् ॥

विशिष्टवैशिष्ट्यज्ञानं चतुर्विधम् । एकं नीलो घटः जातिमान् घटः इत्यादिकं विशेष्ये विशेषणम् तत्र च विशेषणान्तरमित्यादिरीत्या विषयताशालिज्ञानम् । तत्र विशेष्यं घटः । तत्र च विशेषणं नीलरूपं जातिश्च । तत्र नीलत्वस्य जातित्वस्य च विशेषणत्वात् । अन्यदेकञ्च रक्तदण्डवांश्चैत्र इत्यादिकं विशिष्टस्य वशिष्ट्यावगाहि ज्ञानम् । रक्तरूपविशिष्टस्य दण्डस्य पुरुषे वैशिष्ट्यावगाहित्वात् । तत्राऽपि विशेष्ये विशेषणम् तत्र च विशेषणान्तरमिति विषयताप्यस्त्येव । तादृशविशिष्टविषयतायाः विशिष्टस्य वैशिष्ट्यावगाहिविषयताव्यापकत्वात् ॥

परन्तु विशिष्टस्य वैशिष्ट्यावगाहिविषयतातु विशेष्ये विशेषणमिति विषयताशालिज्ञानमात्रे नास्ति क्वचिदपि सामग्र्यभावात् । विशेष्ये विशेषणमिति ज्ञानस्य विशषणज्ञानादिघटितविशिष्टज्ञानसामान्यसामग्रीमात्रजन्यत्वात् । विशिष्टस्य वैशिष्ट्यावगाहिज्ञाने त्वधिकस्य विशेषणतावच्छेदकप्रकारकस्य निश्चयस्य कारणत्वात् । तदुक्तं अनुमितिलक्षणे शिरोमणि भट्टाचार्यैः—दण्डो रक्तो नवेति संशये रक्तदण्डवानिति ज्ञानाऽनुदयात् इति । क्वचिद्विशिष्टवैशिष्ट्यबोधे च घटो नास्तीत्यादौ विशेषणतावच्छेदक प्रकारकसंशयनिश्चयसाधारणज्ञानत्वेनैव कारणत्वम् । अत एव अभावलौकिक प्रत्यक्षे प्रतियोगितावच्छेदकप्रकारकज्ञानत्वेन जनकत्वमपीति प्राचीनैरप्युक्तम् । उभयथाऽपि सामग्रीभेदोऽस्त्येव । अधिकञ्च प्रमाणग्रन्थे वक्ष्यामः ॥

अपरमेकं छत्री कुण्डली वासस्वी देवदत्त इत्यादिकं एकत्र द्वयमिति न्यायेन विषयताशालिज्ञानम् । तत्रैव देवदत्ते छत्रकुण्डलवाससां युगपद्विशेषणत्वात् । तदपि विशेषणज्ञानादिघटितविशिष्टज्ञानसामग्रीमात्रजन्यम् ॥

इतरदेकं च एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यावगाहि खड्गी चैत्र श्शूर इत्यादिकम् । तत्र खड्गविशिष्टे चैत्रे शौर्यवैशिष्ट्यभानात् । तत्र च विशेष्यतावच्छेदकप्रकारनिश्चयः कारणम् । विशेष्ये खड्गनिश्चयाभावे शौर्यज्ञानाभावस्य सर्वानुभवसिद्धत्वात् । तद्विषयताव्यापिका एकत्र द्वयमिति विषयता तत्सामग्र्या अप्यत्राप्रत्यूहत्वात् । परन्तु एकत्र द्वयमिति विषयताशालिज्ञानसामान्ये विशिष्टे वैशिष्ट्यमिति विषयता नास्ति तत्सामग्र्या असार्वत्रिकत्वात् ॥

इदमत्रावधेयम् । यादृशविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यं भासते तादृशविशेषणसमानकालीनत्वं विशेषणान्तरे भासते खड्गकालावच्छेदेनैव शौर्यस्याप्यनुभवात् । अत एव [1]वाजपेयाधिकरणे (१-४-६) स्वाराज्यकामो वाजपेयेन यजेतेत्यादौ गुणविधित्वे स्वाराज्यसाधनत्वविशिष्टे यागे वाजपेयगुणसाध्यत्वान्वये स्वाराज्यसाधनत्वसमानकालीनत्वस्यापि वाजपेयसाध्यत्वेज्ञानात् एककालावच्छेदेन एकत्र साध्यत्वसाधनत्वयोर्विरोधेन न गुणविधित्वम् । किन्तु कर्मनामधेयत्वं वाजपेयस्येति मीमांसकैरपि सिद्धान्तितम् । एतत्तत्त्वं चास्मत्कृतजैमिनिसिद्धान्तसारे निपुणतरं विवेचितम्; तत्रैवानुसन्धेयम् ॥

1 प्रथमचतुर्थपादे स्थितम्—वाजपेयेन स्वाराज्यकामो यजेत इत्यत्र वाजपेयशब्दः गुणविधायकः उतकर्मनामेति सन्देहे आख्यातार्थे गुणफलयोः तन्त्रेण सम्बन्धसम्भवात मत्वर्थलक्षणाविरहात गुणविधिरिति पूर्वपक्षः । भावनायाः कर्मकरणान्यतरापेक्षत्वात् सम्बन्धमात्रान्वयायोगात् । उभयान्वये च यागस्यफलान्वयार्थं उपादेयत्वविधेयत्वगुणत्वानि गुणान्वयार्थं च उद्देश्यत्वानुवाद्यत्वप्रधानत्वानीति विरुद्धत्रिकद्वयापत्तेः मत्वर्थलक्षणाभिया कर्मनामत्वमिति सिद्धान्तः ।

कथमेवं विषयतावैलक्षण्यं स्वीक्रियत इति चेन्न । अनुभवं पृच्छ । तदुक्तम् लिङ्गकारणतावादे शिरोमणिभट्टाचार्यैः । अनुभवसिद्धो ह्ययं विशिष्टवैशिष्ट्यबुद्धीनां विषयताविशेष इति ॥

विशिष्टवैशिष्ट्यबोधेऽपि विशेणज्ञानादिघटितविशिष्टज्ञानसामग्र्यतिरिक्त-सामग्री न कल्प्यते । विशिष्टवैशिष्ट्यज्ञानस्यार्थसमाजग्रस्तत्वादिति[1] मणिकृतः । तत्र च विचित्रसामग्र्यभावे विचित्रकार्यं कथमिति चिन्त्यम् । [एक] जातिस्थलेऽपि सामग्रीवैचित्र्यं स्फुटमेव । पाकजरूपरसादावपि तत्तत्प्राग-भावानां तद्भेदकादृष्टानां च वैचित्र्यात् सामग्रीवैचित्र्यं स्फुटतरम् ॥

निर्विकल्पकञ्च वैशिष्ट्यानवगाहि ज्ञानम् । तच्चातीन्द्रियम् । तत्र प्रमाणञ्च कार्यकारणभावविवेचनावसरे वक्ष्यामः । तच्च ज्ञानं स्मृतिरनु-भूतिश्चेति द्विविधम् ॥

अनुभूतिश्चतुर्विधा । प्रत्यक्षानुमित्युपमितिशाब्दभेदात् । प्रत्यक्षमपि षड्विधम् । चाक्षुषरासनस्पार्शनश्रावणमानसघ्राणजभेदात् । प्रत्यक्षं चसंशय-निश्चयरूपेण द्विविधम् । आहार्यानाहार्यभेदेन द्विविधम् ॥

तच्च ज्ञानं द्विविधम् । भ्रमप्रमाभेदात् प्रत्यक्षं च द्विविधम् नित्य-मनित्यं च । अनित्यं च निरुक्तं षड्विधम् । नित्यमीश्वरप्रत्यक्षम् ॥

अत्र प्राभाकराः । संशयभ्रमयोर्मानाभावः । सर्वेषां ज्ञानानां यथार्थत्वात् इति । प्रमाणग्रन्थे विवेचयिष्यामः । ज्ञानं च परोक्षाऽपरोक्ष-भेदेनापि द्विविधमिति सर्वं चतुरस्रम् ॥

1 अर्थः सामग्री, समाजः तत्समुदायः तद्ग्रस्तः तत्प्रयोज्यः ।

सुखं दुःखं च प्रत्यक्षमेव । न च सुखाभाव एव दुःखमिति वाच्यम् ; दुःखाभाव एव सुखमित्यपि सुवचत्वात् । विनिगमकाभावादुभयोरपि सिद्धिः । तदुभयमप्यनित्यमेव । केचित्तु ईश्वरस्य नित्यसुखं श्रुतिबलात् स्वीकुर्वन्ति । श्रुतिश्च सत्यं ज्ञानमनन्तं ब्रह्म[विज्ञानमानन्दंब्रह्म]इत्यादिः ॥

अथ इच्छानिरूपणम्

इच्छाऽपि नित्यानित्यभेदेन द्विरूपा । ईश्वरेच्छा नित्या । तदन्या सर्वाऽनित्या । सा च सर्वा प्रत्यक्षा । द्वेषस्तु सर्वोऽप्यनित्यः । शत्रुं द्वेष्मीति प्रत्यक्षसिद्धिः ॥

प्रयत्नोऽपि नित्याऽनित्यभेदेन द्विविधः । ईश्वरप्रयत्नो नित्यः । तद्भिन्नोऽनित्यः । अनित्योऽपि द्विरूपः । प्रवृत्तिनिवृत्तिभेदात् । न च प्रवृत्त्यभाव एव निवृत्तिरिति वाच्यम् । निवृत्त्यभाव एव प्रवृत्तिरित्यपि सुवचत्वात् । प्रवृत्तिनिवृत्तिभिन्नः रागद्वेषाजन्यः अदृष्टविशेषजन्यः जीवनयोनियत्नः कश्चनापरः यस्मात् सुषुप्तावपि श्वासोद्गमः ; यद्व्यतिरेकाच्च मूर्च्छादौ श्वासाभावः । सचातीन्द्रियः । तदन्यस्सर्वोऽपि प्रत्यक्ष एव ॥

ननु जीवनयोनियत्ने मानाभावः । सुषुप्तादौ श्वासादेरावश्यकादृष्टविशेषादेवोपपत्तेः । तद्धेतोरेवेति न्यायादिति चेत् ॥

अत्राहुः । भारं वहतो धावतोऽवहननादिकं कुर्वतः प्रयत्नोत्कर्षेण श्वासोत्कर्षदर्शनात् । कारणोत्कर्षव्यतिरेकेण कार्योत्कर्षाभावात् श्वासविशेषे प्रयत्नविशेषस्य कारणत्वे सिद्धे [1]यद्विशेषयोरिति न्यायेन श्वासत्वावच्छिन्नं प्रति प्रयत्नस्य कारणत्वावधारणात् सुषुप्तादौ रागद्वेषाद्यभावेन यत्नान्तराभावात्

1 यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोरपि कार्यकारणभाव इति न्यायः ।

श्वासस्य चानुभूयमानत्वात्तज्जनकजीवनयोनियत्नसिद्धिः । किञ्च समाधिस्थस्य रागद्वेषाद्यभावेऽपि श्वासदर्शनात्तत्कारणत्वेनाऽपि जीवनयोनियत्नसिद्धिः ॥

एते बुद्ध्यादयः षट् द्विक्षणमात्रावस्थायिनः । चतुर्थादिक्षणे तेषामननुभवात् योग्यविभुविशेषगुणत्वावच्छिन्नं प्रति स्वाधिकरणक्षणोत्तरोत्पन्नगुणत्वेनैव नाशकत्वं कल्प्यते । अत एव शब्दस्याऽपि द्विक्षणमात्रावस्थायित्वमिति सर्वं समञ्जसम् ॥

धर्माऽधर्मौ अतीन्द्रियौ अनित्यौ । स्नानदानहोमयागहिंसापैशुन्यादिजन्यत्वात् बहुविधौ । फलभोगप्रायश्चित्तकर्मनाशाजलस्पर्शनकीर्तनादिनाश्यौ ॥

संस्कारश्च त्रिविधः । वेगो भावना स्थितस्थापकश्चेति । तत्र वेगो मूर्तद्रव्यमात्रवृत्तिः । स्थितस्थापकश्च स्पर्शवद्द्रव्यविशेषवृत्तिः ; अन्यथाकृतस्य धनुश्शाखादेः पुनः तादवस्थ्यापादकः । तत्र प्रमाणमपि तादृशकार्यमेव । वेगेनैव तस्याप्युपपत्तौ स्थितस्थापके मानाभाव इत्यपि केचित् ॥

भावनाख्यसंस्कारोऽप्यतीन्द्रियः । स्मृतिजनकः । स च निश्चयजन्यः । निर्विकल्पकसंशयाभ्यां संस्कारस्मरणानुत्पादात् । अत एव स्मरणरूपो न संशयः । न वा निर्विकल्पकं तत् । न चैवं " अस्तु वा पदादपि निर्विकल्पक "मिति मणिवचनविरोध इति वाच्यम् । तुष्यतु दुर्जन इति न्यायात् । स च संस्कारो रोगस्मरणनाश्यः । देहात्मादिभ्रमजनकस्य वासनाख्यसंस्कारस्य च तद्विरोधिज्ञाननाश्यत्वस्य श्रुत्यादिसिद्धत्वात् अन्यत्रापि संस्कारे तद्विरोधिज्ञाननाश्यत्वं कल्प्यते । कालरोगयोस्संस्कारनाशकत्वमध्ययनादौ स्फुटमेव । स्मरणस्य तथात्वञ्च कार्यकारणभावविचारावसरे वक्ष्यामः ॥

ननु धर्माऽधर्मभावनासु मानाभावः [1]ध्वंसद्वारैव यागादिभ्यः कालान्तरभाविफलसम्भवादिति चेन्न । प्रतियोगिध्वंसयोरेकत्राजनकत्वात् । तथात्वे

1 A adds ध्वंसादिभ्यः काला ।

प्रत्युत यागादेः कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकत्वप्रसङ्गात् । एतदभिप्रायेणैव

"चिरध्वस्तं फलायालं न कर्मातिशयं विना "त्युक्तम्[1] ॥

केचित्तु सत्कर्मणो देवताप्रीतिद्वारम्, असत्कर्मणो देवताया अप्रीतिद्वारमिति न धर्माधर्मसिद्धिरित्याहुः । तदतिस्थवीयः । देवताप्रीतेः कृतिव्यधिकरणत्वेन कृतिजन्यत्वासम्भवात् । फलव्यधिकरणत्वेन फलजनकत्वासंभवाच्च । प्रीतेस्सर्वथैवानुद्देश्यत्वात् । तेन पितृस्वर्गादिकमुद्दिश्य क्रियमाणवृषोत्सर्गकन्यादानाश्वमेधगयाश्राद्धादिकर्मभ्यः पितरि फलजननेऽपि न विरोधः । तत्र तस्योद्देश्यत्वात् ॥

अन्ये तु यागादेरेव तावत्कालस्थायित्वं कल्प्यते । तत्समयविशेषरूपकारणाभावादेव चतुर्थादिक्षणे यागादेरप्रत्यक्षत्वोपपत्तिरित्याहुः । तदपि न ज्यायः । यागादेस्सङ्कल्पादिरूपत्वेन यथाकथञ्चित् तस्य स्थायित्वसमर्थनेऽपि एककालावच्छेदेन वहिःप्रदेशावच्छिन्नसर्वाङ्गीणगङ्गाजलसंयोगरूपस्य गङ्गाजलनाशेन नाशात् । फलस्य कालान्तरभावित्वात् । उक्तयुक्त्या ध्वंसस्य व्यापारत्वासम्भवात् अपूर्वसिद्धेः, अन्यत्रापि तथात्वौचित्यात् । न च हविर्वह्निसंयोगादेर्यथा न यागत्वं अपि तु सङ्कल्पविशेषस्यैव, तथा सङ्कल्पविशेषस्यैव स्नानत्वमिति वाच्यम्

'गङ्गायां मौसलस्नानं महापातकनाशनम्'

इति सङ्कल्पशून्यस्यापि तस्य स्नानत्वस्मरणात्, फलजनकत्वस्मरणाच्च ॥

इतरे तु पूर्ववर्त्तिन एव कारणत्वं न त्वव्यवहितपूर्ववर्तिनः गौरवात् । इत्थञ्चाशुविनाशिनः निर्व्यापारस्यापि यागादेः कारणत्वमविरुद्धमिति वदन्ति ।

1 न्या. कु. परि ।

तदतितुच्छम् । भग्नदण्डस्य कुलालादेःघटार्थिनः दण्डान्तरे प्रवृत्तिर्न स्यात् । एवं नष्टपत्नीकस्य रागिणः विवाहान्तरे, नष्टौदनस्य बुभुक्षितस्यौदनान्तरे प्रवृत्तिर्न स्यात् ॥

स्यादेतत । ध्वंस एव व्यापारोऽस्तु प्रतियोगिध्वंसयोरेकत्राजनकत्वादिति मन्त्रपाठस्याप्रयोजकत्वात् । अन्यथा प्रागभावध्वंसयोरेकत्राजनकत्वादिति नियमेन मणिप्रागभावध्वंसयोरपि दाहकजनकत्वं न स्यात् । न च प्रतिबन्धकत्वप्रसङ्गः । संसर्गाभावत्वेन कारणीभूताऽभावप्रतियोगिन एव प्रतिबन्धकत्वात् । अन्यथा घटाभावादिप्रत्यक्षकारणीभूताऽभावप्रतियोगित्वेन घटादेरपि घटाभावादिप्रत्यक्षप्रतिबन्धकत्वप्रसङ्गात् । चाक्षुषकारणीभूतालोकरूपाभावप्रतियोगिनोऽन्धकारस्य चाक्षुषप्रतिबन्धकत्वापाताच्च । न च ध्वंसस्यानन्तत्वात् स्वर्गधारापत्तिः । चरमस्वर्गाधिकरणध्वंसस्य प्रतिबन्धकत्वात् पुण्यपापशव्दानां च सदसत्कर्मवचनत्वादिति चेत ॥

अत्रोच्यते । अस्ति तावदिदम् ।

"कर्मनाशाजलस्पर्शात् करतोयातिलङ्घनात् ।
गण्डकीबाहुतरणात् धर्मः क्षरति कीर्तनात् ॥"

इत्यादिस्मरणम् । तत्रत्यधर्मशव्दो न कर्मपरः तस्य पूर्वमेव नष्टत्वेन कालान्तरीयकीर्तनादेस्तन्नाशजनकत्वासम्भवात् ध्वंसस्य च नाशाभावात् नित्यत्वात् । नापि कीर्तनादेः प्रतिवन्धकत्वम् । तस्याप्याशुविनाशित्वेन तन्नाशानन्तरं फलोत्पादप्रसङ्गात् । नापि कीर्तनादिध्वंसप्रतिबन्धकता, कीर्तनकाले फलोत्पत्तिप्रसङ्गात । कीर्तनानन्तरकृतयागादीनामपि फलाभावप्रसङ्गाच्च । न च यागान्तरमुत्तेजकमिति वाच्यम् । यागध्वंसानन्तरमपि विशिष्टाभावसंपत्त्यर्थं तद्ध्वंसस्यापि उत्तेजकत्वं वाच्यम् । तथा च पुनः कीर्तनादेर्विफलभावप्रसङ्गात् । न च तत्कर्मजन्यफलं प्रति तत्कीर्तनादित्वेन प्रतिबन्धकत्वमिति वाच्यम् । कीर्तनादिस्थलीयकर्मजन्यफलासिध्या तादृश-

प्रतिबन्ध्यप्रतिबन्धकभावस्य कल्पयितुमशक्यत्वात् । तस्मात्कीर्तनादिनाश्यः धर्मपदवाच्यः कश्चन यागादिजन्योऽङ्गीकर्तव्यः ॥

अत्र मीमांसकाः, दर्शपूर्णमासस्थले आग्नेयादिषड्यागकर्तुरेव फलम् । न त्वेकादिविकलस्य इति सर्वसिद्धम् । तत्र च फलं प्रति षण्णां ध्वंसानां कारणत्वकल्पनापेक्षया लाघवादेकमेवापूर्वं तत्कारणं सिध्यति । तदपूर्वं प्रति षडपूर्वस्य कारणत्वकल्पने गौरवादेकद्वयजन्यापूर्वसिद्धिः । अत एव दर्शपूर्णमासाभ्यामिति द्विवचनमपि साधु सङ्गच्छते । साङ्गाद्वैदिककर्मणः फलावश्यम्भावित्वात् एकाङ्गविकलेऽपि फलाभावात् अनन्तकोटिध्वंसानां फलहेतुत्वकल्पनापेक्षया लाघवेन एकमेवापूर्वं फलजनकत्वेन सिध्यतीति प्राहुः ॥

प्राभाकरास्तु 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादौ स्वर्गरूपेष्टसाधनत्वं विधिना बोध्यते, तच्च न साक्षादिति परंपरया तद्वाच्यम् । तदपि परंपरासाधनत्वं परंपराघटकोपस्थितिं विना न सम्भवति । परम्पराघटकश्च उक्तयुक्त्या न ध्वंसादिरिति अपूर्वद्वारा स्वर्गसाधनत्वं वेदेन बोध्यते । तथा च विधिनैवापूर्वसिद्धिरिति वदन्ति ॥

'प्रायश्चित्तादिनाश्यत्वेनाधर्मसिद्धिः'

इति विशिष्टबुद्धिं प्रति विशेषणविषयकत्वेन कारणत्वात् स्मृतेरपि विशिष्टबुद्धित्वात्, तत्र च पूर्वानुभवस्य परंपरया अन्यत्र च साक्षात्कारणत्वेन नानाकार्यकारणभावापत्त्या विशेषणविषयकत्वेन कारणत्वात् संस्कारसिद्धिः । तस्य सविषयकत्वमपि धर्मिग्राहकमानसिद्धमिति सम्प्रदायः ॥

दीधितिकृतस्तु निरुक्तकार्यकारणभावे मानाभावात् विशिष्टानुभवं विशिष्टप्रत्यक्षं प्रत्येव विशेषणज्ञानत्वेन कारणत्वात् न तथा भावनासिद्धिरिति प्राहुः । बुद्धीच्छाद्वेषप्रयत्नभावनाख्यसंस्कारास्सविषयाः । तदतिरिक्तास्सर्वे पदार्थानिर्विषया एव ॥

अत्र केचित् ज्ञानमेकं सविषयकं, इच्छादीनां सविषयकत्वं शब्दस्यैव भाक्तम् । न च विनिगमनाविरहः । प्राथम्यादिच्छादिषु कारणत्वाच्च ज्ञानस्यैव सविषयत्वौचित्यादित्याहुः । तन्न ज्यायः । 'घटं जानामी'तिवत् 'घटं करोमि' 'घटमिच्छामि' 'घटं द्वेष्मी'ति सविषयत्वानुभवस्य सर्वत्राविशेषात् । ज्ञाने घटसम्बन्धवत् इच्छादौ [1]घटादिसम्बन्धस्यापि विषयतातिरिक्तस्यासम्भवात् । न च स्वजनकज्ञानविषयत्वमेव सम्बन्ध इति वाच्यम् । गौरवात् । स्वजन्येच्छाविषयत्वमेव ज्ञानघटयोस्सम्बन्ध इति ज्ञानस्यैव निर्विषयत्वप्रसङ्गाच्च । ज्ञानानुपस्थितावपि इच्छाद्युपस्थितेरानुभाविकत्वेन प्रथमोपस्थितिनियमाभावात् । कदाचित् प्रथमोपस्थितेश्चाविशेषात् । घटमिच्छति घटं करोति घटं द्वेष्टीत्यादौ सविषयत्वाभावे घटादीनां कर्मत्वं न स्यात्; धात्वर्थतावच्छेदकफलशालित्वाभावात्; परसमवेतक्रियाजन्यफलशालित्वाभावाच्चेति । सविषयकत्वे तु घटं जानातीत्यादौ घटादेरिव विषयत्वेनैव कर्मत्वोपपत्तिः ॥

इच्छाकृत्योश्च विषयत्वं त्रिविधम् । उपादानत्वसाध्यत्वोद्देश्यत्वभेदात् । तन्त्वादेश्च उपादानत्वेन विषयत्वम् । पटादेश्च साध्यत्वेन विषयत्वम् । परिधानादेश्चोद्देश्यत्वेन विषयत्वम् । अत एव कर्मकरणेतिकर्तव्यतादीनां भावनाविषयत्वं स्वीकृतं भट्टाचार्यैः ॥

उक्तञ्च-'सर्वोऽप्ययं भावनाया एव प्रपञ्च' इति । अत एव इच्छास्वाभाव्यादसिद्धोपरागेण सिद्धविषयिणी इच्छेति तत्र तत्रोक्तं सङ्गच्छते । अत एव इच्छाकृत्योः फलज्ञानं उपादानप्रत्यक्षं च कारण(त्व)मित्यपि सङ्गतम् । अन्यथा तेषां भिन्नविषयकत्वेन कारणत्वासम्भवादिति सर्वं भद्रम् ॥

तत्र रूपं द्रवत्वञ्च पृथिव्यादित्रयवृत्ति । रसो गुरुत्वञ्च पृथिवीजलवृत्ति । गन्धः पृथिवीमात्रवृत्तिः । स्नेहः जलमात्रवृत्तिः । बुद्ध्यादयो

1 A reads घटादीच्छा ।

भावनान्ता आत्ममात्रवृत्तयः । स्थितस्थापकः स्पर्शवद्विशेषवृत्तिः । तत्र रूपरसगन्धस्पर्शसांसिद्धिकद्रवत्वस्नेहशब्दबुद्ध्यादिभावनान्ता विशेषगुणाः । तदन्ये सामान्यगुणा इति सर्वमवदातम् ॥

चतुर्विंशतिसङ्ख्याका गुणा राद्धान्तरीतितः ।
प्रोक्तास्तेषाञ्च नामानि कथितान्याश्रयक्रमात् ॥

कर्मनिरूपणम्

कर्म च निरुक्तम् । तत्र प्रमाणं प्रत्यक्षमेव । तस्य चक्षुस्त्वगिन्द्रियवेद्यत्वात् । तच्चोत्सर्गतश्चतुःक्षणावस्थायि । तस्य स्वजन्यसंयोगनाश्यत्वात् । क्रिया, क्रियातो विभागः, विभागात् पूर्वदेशसंयोगनाशः, पूर्वदेश संयोगनाशादुत्तरदेशसंयोगः, तेन च क्रियानाश इति तस्य चतुःक्षणावस्थायित्वम् । स्वाश्रयनाशकसामग्रीसमव(या)धानकालोत्पन्नक्रियायास्तु तृतीयादिक्षणे नाशात् कस्याश्चित्क्रियाया द्विक्षणावस्थायित्वम् । आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियायाश्च पञ्चक्षणावस्थायित्वम्, आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियाया अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वाभावात् । अन्यथा विकसत्कमलमुकुळादौ कमलभङ्गप्रसङ्गात् । तथा चारम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियया तथाविधविभागः । तत आरम्भकसंयोगनाशकाले अनारम्भकसंयोगप्रतिद्वन्द्वी विभागः । ततो द्रव्यनाशकाले अनारम्भकसंयोगनाशः । तत उत्तरदेशसंयोगः । तेन क्रियानाश इति पञ्चक्षणावस्थायित्वम् । आरम्भकसंयोगनाशमपेक्ष्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वमते षट्क्षणावस्थायित्वम् । द्रव्यनाशमपेक्ष्य तथाविधविभागजनकत्वमते सप्तक्षणावस्थायित्वम् । एतेन शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वमिति भ्रान्तानां मोहो हेयः । शब्दबुद्ध्यादीनां द्विक्षणावस्थायित्वस्य निवेदितत्वात् । कर्मणां चतुःक्षणावस्थायित्वं विज्ञापितमेव । कर्मविशेषस्य बुद्धिविशेषस्य च तथात्वेऽपि शब्दस्य त्रिक्षणावस्थायित्वमसम्भावितमेवेति सर्वं समञ्जसम् ॥

सामान्येऽपि प्रत्यक्षमेव मानम् । तस्य षडिन्द्रियवेद्यत्वात् ।

अत्र चार्वाकादयः, सामान्ये मानाभावः । चित्रेषु घटादिषु अयं घटोऽयं घट इति प्रतीतिव्यवहारयोरपि अघटव्यावृत्तिरूपाभावादेवोपपत्तेरिति वदन्ति । तन्न । अघटव्यावृत्तिरित्यत्राघटत्वं घटभिन्नत्वं, तच्च न घटप्रतियोगिकभेदवत्वम् । एकघटप्रतियोगिकभेदस्य घटान्तरे सत्वेन तद्व्यावृत्तेस्तत्राभावात्तत्र घटव्यवहारो न स्यात् । किन्तु घटसामान्यावच्छिन्नप्रतियोगिताकभिन्नत्वं घटभिन्नत्वं वाच्यम् । तत्र च घटसामान्यं यदि निरुक्तं व्यावृत्तिरूपं तदा अन्योन्याश्रयादिः । तस्माद्भावरूपं सर्वघटानुगतसामान्यमवश्यमङ्गीकार्यम् । एवं पटादिसामान्यमपीति जलाहरणयोग्यत्वपरिधानयोग्यत्वादीनाञ्च घटपटादिव्यवहारनियामकत्वे भस्त्रिकाकम्बलादावपि घटपटव्यवहारप्रसङ्गात् । योग्यतावच्छेदकं विना योग्यत्वस्याप्यननुगतत्वाच्च । सामान्यं नित्यम् । तर्हि प्रळयादौ घटादिजन्यद्रव्याभावात् घटत्वादिजातीनां क्व वृत्तिरिति चेत् श्रुतमस्माभिः[1] काल एव । तच्च सामान्यमनित्यमिति वेदान्तिनः ॥

विशेषनिरूपणम्

शब्दाश्रयत्वातिरिक्तस्याकाशत्वस्याभावात्, शब्दसमवायिकारणतावच्छेदकत्वेन विशेषसिद्धिः । न च गगनैकत्वमेव तथेति वाच्यम् । गगनपरिमाणमादाय विनिगमनाविरहात् । विशेषस्य धर्मिग्राहकमानेन तदवच्छेदकत्वेनैव सिद्धत्वात् न ताभ्यां विनिगमनाविरहः ॥

समवायनिरूपणम्

समवाये प्रमाणञ्च प्रत्यक्षमेव । इह तन्तुषु पटसमवाय इत्यनुभवात् । प्राभाकरवैशेषिकौ च अतीन्द्रियो नित्य इति वदतः ॥

1 A reads श्रूयतां युष्माभिः ।

अत्र भट्टाचार्याः, समवाये मानाभावः। निरुक्तप्रत्यक्षस्य स्ववासनामात्रकल्पितत्वात्। कस्तर्हि अवयविगुणक्रियासामान्यादीनामवयवादिभिः सम्बन्ध इति चेत्? श्रूयतां सावधानतः। अस्ति हि भूतले घटो नास्तीति प्रतीत्या भूतलाभावयोः कश्चन सम्बन्धः। स च न संयोगः। न समवायः। तयोर्भावमात्रसम्बन्धत्वात् स्वरूपस्य सम्बन्धत्वे अतिप्रसङ्गात् अननुगमाच्च। वैशिष्ट्यनामके कस्मिंश्चित् सम्बन्धे कल्प्यमाने लाघवेनावयव्यादिसाधारण एव सम्बन्धः कल्प्यते। अन्यथा सम्बन्धान्तरकल्पने गौरवादित्याहुः॥

अत्र ब्रूमः। एतत्कपालनाशादेतत्कपालसम्बद्धद्रव्यगुणकर्मणां नाशस्य सर्वसिद्धत्वात्, तत्र च तत्तन्नाशं प्रति तत्तन्नाशस्य कारणत्वकल्पने नानाकार्यकारणभावप्रसङ्गात्, एतत्कपालविशिष्टनाशं प्रति एतत्कपालनाशत्वेन कारणत्वे कल्प्यमाने एतत्कपालवृत्तिध्वंसस्याऽपि नाशापत्त्या अभावव्यावृत्तं वैशिष्ट्यं वाच्यम्। स एव समवायः। न चैवमपि एतत्कपालसमवेतनाशं प्रत्येतत्कपालनाशत्वेन कारणत्वकल्पनेऽपि एतत्कपालसमवेतसामान्यस्याऽपि नाशापत्त्या नाशत्वावच्छिन्नं प्रति जन्यभावत्वेन कारणत्वमिति कार्यकारणभावस्यावश्यकत्वेन समवायाभावेऽपि न ध्वंसध्वंसापत्तिरिति वाच्यम्। नाशत्वावच्छिन्नं प्रति जन्यत्वेनैव कारणत्वकल्पनात्। न तु भावत्वं निविशते गौरवात्। एतच्चास्मत्कृतलीलावतीरहस्ये अनुसन्धेयम्॥

साम्प्रदायिकास्तु, नित्यमेकमनेकानुगतं सामान्यमिति हि सामान्यलक्षणम्। तत्रानेकगतत्वं न सम्बन्धसामान्येनानेकवृत्तित्वम् अभावस्याऽपि सामान्यत्वप्रसङ्गात्। किन्त्वनेकसमवेतत्वं तदिति वाच्यम्। तथा च समवायसिद्धिः। अत एव सामान्यं द्विविधम्। जातिरुपाधिश्चेति मतमपास्तम्। उपाधेस्समवायाभावेन सामान्यत्वभङ्गप्रसङ्गात्। तस्य नित्यत्वाभावाच्च, तस्य नित्यत्वस्वीकारे कम्बुग्रीवादिमत्वादिनैव सर्वोपपत्तौ जातिविलोपप्रसङ्गात्। नचेष्टापत्तिः। द्वैविध्याभावेन तवैव व्याघातात्। नाममात्रस्य भिन्नत्वात्। अत्र च गगनादावतिव्याप्तिवारणाय—अनुगतेति। संयोग-

द्वित्वादौ तन्निरासाय-नित्यमिति । एकमिति सम्पातायातम् । नित्यमनेकसमवेतं सामान्यमिति सम्यक्त्वादिति प्राहुः ॥

अभावनिरूपणम्

अत्यन्ताभावोऽन्योन्याभावश्च चतुर्विधौ । विशेषाभावस्सामान्याभावो विशिष्टाभावो व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावश्चेति । तत्र विशेषाभावः तत्तद्धटत्वादिविशेषधर्मावच्छिन्नप्रतियोगिताकः । सामान्याभावश्च घटत्वपटत्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकः । विशिष्टाभावः दण्डविशिष्टपुरुषत्वावच्छिन्नप्रतियोगिताकः । व्यासज्यवृत्तिधर्मावच्छिन्नाभावश्च द्वित्वादिव्यासज्यवृतिधर्मावच्छिन्नप्रतियोगिताकः ॥

ननु किमिदं प्रतियोगित्वम् ? । किंवा तदवच्छेदकत्वमिति ? । अत्र आचार्याः[1] । प्रतियोगित्वं अभावाभावत्वम् । भवति च घटाभावे घटः प्रतियोगी । घटाभावाभावोऽपि घटः । घटवत्येव घटाभावाप्रतीतेः, व्यवहाराच्च । तयोश्च घटेनैवोपपत्तावतिरिक्ताभावकल्पने गौरवात अनवस्थाप्रसङ्गात् । तथा च घटाभावाभावत्वस्य घट एव सत्वेन तदेव घटस्य प्रतियोगित्वम् । तदवच्छेदकत्वं च अन्यूनानतिरिक्तवृत्तिधर्मः । इत्थञ्च विशेषाभावप्रतियोगितावच्छेदकं न घटत्वमेव, उक्तयुक्तेः । न च कम्बुग्रीवादिमत्वस्याऽपि तथात्वात् तत्कुतो नावच्छेदकमिति वाच्यम् । तस्य गुरुधर्मत्वात् लघुधर्मस्यैवावच्छेदकत्वात् । तदुक्तं व्याप्तिवादे शिरोमणिभट्टाचार्यैः । 'सम्भवति लघौ गुरौ तदभावादि'ति ॥

विशिष्टाभावप्रतियोगितावच्छेदकः विशिष्टधर्मः उक्तयुक्तेः । चतुर्थस्तु स्फुटः । व्यासज्यवृत्तिधर्मश्च द्वित्वादिः । स चाभावः 'इह घटपटोभयं

1 उदयनाचार्याः—अभावविरहात्मत्व वस्तुनः प्रतियोगिता इति कुसुमाञ्जलौ ।

नास्ती 'ति प्रतीतिसिद्धः । घटपटोभयाभावप्रतियोगितावच्छेदकं घटपटोभयत्वमित्याहुः ॥

अत्र मणिकृतः । अभावाभावत्वं न प्रतियोगित्वं अभावत्वस्य भावधर्मत्वाभावात्; अन्यथाऽभावत्वस्य केवलान्वयित्वापातात् । नचेष्टापत्तिः । तस्य विभाजकत्वाभावेनाभावस्य पृथक्पदार्थत्वानुपपत्तेः । विभाजकस्यातिरिक्तस्य कस्यचिदभावत्वस्य स्वीकारे निरुक्ताभावत्वे मानाभावात् । किञ्चाभावाभावत्वं न प्रतियोगित्वम् । पटाभावाभावत्वस्य घटाभावप्रतियोगित्वप्रसङ्गात् । किन्तु स्वाभावाभावत्वं स्वस्य प्रतियोगित्वम् । तथा च स्वाभावेत्यत्र षष्ठ्यर्थप्रतियोगित्वप्रवेशेनात्माश्रयात् । परन्तु प्रतियोगित्वं स्वरूपसम्बन्धविशेष इति प्राहुः । एतदेवोक्तं व्याप्तिवादपूर्वपक्षे शिरोमणिभट्टाचार्यैः 'स्वाभावेत्यत्र षष्ठ्यर्थप्रतियोगितायाः प्रवेशात् तत्र स्वरूपसम्बन्धस्यैव शरणीकरणीयतया तस्यावश्यकत्वेन तथात्वौचित्यादिति ॥

केचित्तु विरोधित्वमेव प्रतियोगित्वमिति वदन्ति । तन्न सम्यक् । संयोगात्यन्ताभावप्रागभावध्वंसान्योन्याभावप्रतियोगिन्यव्याप्तेः । गोत्वाश्वत्वयोरपि परस्परविरोधेन परस्परप्रतियोगित्वप्रसङ्गाच्च ॥

दीधितिकृतस्तु अभावाभावत्वं प्रतियोगित्वम् । घटाभावाभावो हि न घटः उक्तयुक्तेः । किन्तु घटसमनियतोऽतिरिक्तः । अन्यथा भावे अभावत्वप्रकारकप्रतीतेः भ्रमत्वाप्रसङ्गात् । तदभावस्तु घटाभावएव । तत्रोक्तबाधकाभावात् । अतो नानवस्था । नापि स्वरूपसम्बन्धविशेषः प्रतियोगित्वम् । तस्य तत्तत्प्रतियोगिरूपस्याननुगमेनानुगतप्रतियोगिव्यवहारानुपपत्तेः । तस्मात् प्रतियोगित्वमखण्डोपाधिरतिरिक्तः पदार्थ इति प्राहुः ॥

वस्तुतस्तु प्रतियोगितावच्छेदकस्वरूपमेव प्रतियोगित्वम् । अतो नाननुगमः । नचैकस्यैवावच्छेदकत्वमवच्छेद्यत्वं च विरुद्धमिति वाच्यम् ।

प्रकारभेदेन विरोधाभावात् । अस्ति च प्रकृते प्रकारभेदः । घटत्वेनावच्छेद्यत्वस्य स्वरूपतोऽवच्छेदकत्वस्य च स्वीकारात् । अधिकञ्चाग्रे वक्ष्याम इति सकलं भद्रम् ॥

एवं प्रतियोगितावच्छेदक[त्व]मपि स्वरूपसम्बन्धविशेष इति निगर्वः । एतेन प्रतियोगितावच्छेदकत्वं नान्यूनानतिरिक्तवृत्तिधर्मत्वम् । तद्घटसमवेतरूपरसादीनामपि विनिगमनाविरहेण विशेषाभावप्रतियोगितावच्छेदकत्वापातात् । नापि प्रतियोगिनि प्रकारीभूय भासमानधर्मत्वम् । दत्तोत्तरप्रायत्वात् । नापि प्रतियोगिनि कारणीभूतज्ञानप्रकारीभूय भासमानधर्मत्वं । कारणतावच्छेदकावच्छिन्नस्यैव कारणत्वेन पूर्वदोषानुवृत्तेः । नापि प्रतियोगिफलोपहितज्ञाने प्रकारीभूय भासमानधर्मत्वम । एतद्रजतं तत्र नास्तीत्यादौ तद्रजतप्रत्यक्षस्यैव तत्र फलोपहितत्वेन तद्विषयत्वाच्च तद्रूपपरिमाणद्रव्यत्वसत्वादीनामपि तदवच्छेदकत्वापातात् । प्रमेयघटो नास्तीत्यादौ प्रमेयत्वस्याप्यवच्छेदत्वापातात् । कम्बुग्रीवादिमान्नास्ति घ्राणग्राह्यगुणो नास्ति पीतशङ्खो नास्ति लोहितवह्निर्नास्तीत्यादौ कम्बुग्रीवादिमत्वघ्राणग्राह्यगुणत्वपीतत्वविशिष्टशङ्खत्वलौहित्यविशिष्टवह्नित्वादीनामवच्छेदकत्वापाताच्च । अत एवान्यूनवृत्तित्वमनतिरिक्तवृत्तित्वं वा तदित्यपि निरस्तम् । अत एव च अभावज्ञाने प्रतियोग्यंशे प्रकारीभूय भासमानधर्मत्वं तदित्यपि परास्तम् ॥

नाप्यवच्छित्तिप्रत्ययजनकत्वम् । तद्धि वस्तुगतया यदवच्छेद्यं तत्प्रत्ययजनकत्वं वा ? । इदमनेनावच्छिन्नमिति अवच्छिन्नत्वप्रकारकप्रत्ययजनकत्वं वा ? । नाद्यः । घटत्वादेः प्रतियोगित्वज्ञानजनकत्वे मानाभावात् । ‘ इदानीमेतद्देशवृत्त्यभावप्रतियोगिनी मसृणघुसृणारुणातरुणी ’ति नष्टरमणीविषयिणी प्रोषितस्य मतिः । तत्र चारुण्यादेर्नष्टत्वेन जनकत्वाभावादवच्छेदकत्वं न स्यात् । अत एव न द्वितीयः । न च प्रतियोगितावच्छेदकस्यैव प्रतियोगितात्वात् , स्वप्रत्यक्षे च स्वस्य कारणत्वात् अवच्छिन्नप्रत्यक्षजनकत्वं

तदित्युक्तौ नोक्तदोष इति वाच्यम् । अतीन्द्रियेऽवच्छेदके अव्याप्तेः । इत्यादिनिर्वचनाभासा[1] समाधानावसानादरमणीया इति सर्वं शोभनम् ॥

ननु विशेषाभावातिरिक्तसामान्याभावे मानाभावः । नचैवं घटवत्यपि 'घटो नास्ती'ति प्रत्यक्षव्यवहारप्रसङ्गः, विशेषाभावस्य तत्राऽपि सत्वादिति वाच्यम् । विशेषाभावकूटस्यैव तद्विषयत्वाभ्युपगमात् । तस्य च तत्राऽभावादिति चेत् ॥

अत्र मणिकृतः । अस्ति तावद्वायौ 'पृथिवीरूपं नास्ति' 'जलरूपं नास्ति' 'तेजोरूपं नास्ती'ति निश्चये जागरूकेऽपि 'वायौ रूपं न वा' 'वायू रूपवान्न वे'ति सकलानुभवसिद्धः संशयः । स च सामान्याभावाभावेऽनुपपन्नः । तत्र विशेषाभावानां निश्चितत्वात् । निश्चिते च संशयायोगात् । सामान्याभावस्वीकारे च तस्य तत्राऽनिश्चयात् तद्विषयकसंशयः उपपद्यते । न चातिरिक्तसम्भावनाविरहसहकृतस्तथेति वाच्यम् । अतिरिक्तसम्भावना हि अतिरिक्तरूपविषयिणी वा? अतिरिक्ते रसादौ रूपत्वविषयिणी वा? नाद्यः । अप्रसिद्धेः । न द्वितीयः । रसो न रूपं गन्धो न रूपमिति प्रसिद्धभिन्नपदार्थसामान्ये रूपत्वाभावस्य रूपभिन्नत्वस्य च निश्चयेऽपि निरुक्तस्य संशयस्य सर्वानुभवसिद्धत्वादिति प्राहुः ॥

दीधितिकृतस्तु दाहे यावन्मणिसंसर्गाभावस्य कारणत्वकल्पनापेक्षया लाघवात् तत्कारणत्वेन मणित्वावच्छिन्नप्रतियोगिताकसामान्याभावः सिद्धः । नचैवं मणिध्वंसप्रागभावाधिकरणे तदत्यन्ताभावस्य विरोधेन असत्वात्, तदानीमपि दाहानापत्तिरिति वाच्यम् । प्रतियोगिनेव ध्वंसप्रागभावाभ्यामपि विरोधे मानाभावादित्याहुः ॥

नवीनास्तु, जलह्रदादावेव वह्निर्नास्तीति प्रतीतिव्यवहारौ, न तु महानसादाविति सर्वसिद्धम् । तथा चानन्तविशेषाभावानां विषयत्वस्य नियामकत्वस्य

1 A reads मानाभावादनादरणीया ।

2 A reads तथा च ।

च कल्पनमपेक्ष्य एकस्यैवाभावस्य तद्विषयत्वस्य तज्जनकत्वस्य च कल्पनाया लघुत्वादित्यूचुः ॥

केचित्तु तथाऽपि विशिष्टाभावे मानाभावः । दण्डवति दण्डविशिष्ट-पुरुषाभावव्यवहारादेः पुरुषवति तदभावव्यवहारादेश्च पुरुषाभावेन दण्डा-भावेनैव चोपपत्तेरित्याहुः ॥

मणिकृतस्तु कदाचिद्विशेषणाभावस्य कदाचिद्विशेष्याभावस्य च तन्नियामकत्वकल्पने अननुगमात् , विशेषणविशेष्यसम्बन्धाभावो विशिष्टाभावः नत्वतिरिक्तः । किञ्च परस्परासम्बद्धदण्डपुरुषोभयवत्यपि 'दण्डी नास्ती'ति प्रतीतेः, विशेषणविशेष्यसम्बन्धाभावः विशिष्टाभावः, नत्वन्यतराभावः, तस्य तत्राभावादिति वदन्ति ॥

अत्र मिश्रप्रभृतयः दण्डसम्बन्धस्य पुरुषवृत्तित्वेन तदधिकरणे तदभावस्य सत्वात् दण्डिमत्यपि भूतले 'दण्डी नास्ती'ति प्रतीतिप्रसङ्गात् । न च परंपरासम्बन्धेन तदभाववत्येव तत्प्रत्ययादिति वाच्यम् । अन्यधृतदण्ड-संयुक्तपुरुषवति 'तद्दण्डी नास्ती'ति व्यवहारो न स्यात् ; न स्याच्च शिरसि दण्डधरवहनपुरुषवत्यपि देशे 'दण्डी नास्ती'ति प्रतीतिः । तस्मादतिरिक्त-विशिष्टाभावसिद्धिरप्रत्यूहैव । तस्य च धर्मिग्राहकप्रमाणेनानतिप्रसक्तस्यैव सिद्धेः नातिप्रसङ्गशङ्केति प्राहुः ॥

ननु तथाप्युभयाभावे मानाभावः । घटमात्रवति 'घटपटौ न स्त' इति प्रतीतेः पटाभावविषयत्वेन पटमात्रवति तथा प्रतीतेः घटाभावविषयत्वे-नैवोपपत्तेः, उभयशून्ये च तादृश्याः प्रतीतेः विनिगमनाविरहादुभयविषयत्व-मिति चेत् ॥

मेवम् । तत्रोभयत्वं प्रतियोगितावच्छेदकमिति सर्वानुभवसिद्धम् न हि प्रत्येकाभावप्रतियोगितावच्छेदकमुभयत्वं भवितुमर्हतीति तदवच्छिन्न-प्रतियोगिताकाभावः कश्चनातिरिक्तः स्वीकार्यः । किञ्च घटपटमठदण्डमुण्ड-कुड्यकुमुदकुन्दकुसूला न सन्तीत्यादौ दशानामभावानां विषयत्वस्य नियामकत्वस्य च कल्पनमपेक्ष्य तद्विषयत्वेन च लाघवेन एकस्यैव व्यासज्यवृत्ति-धर्मावच्छिन्नप्रतियोगिताकाभावस्य कल्पनाया एवोचितत्वात् ॥

एतेन उभयशून्ये तस्य सिद्धत्वेऽपि एकवत्युभयाभावे मानाभाव इति मतमपास्तम् । उभयत्र प्रतीतिवैलक्षण्यप्रसङ्गात् । उभयत्वादेस्तत्रापि प्रतियोगितावच्छेदकत्वेनानुभूयमानत्वात् क्लृप्तत्वाच्च । न च प्रतियोगि-तावच्छेदकावच्छिन्नप्रतियोगिसत्वस्य गुरुतया प्रतियोगिसत्वस्य लाघवेनाभाव-विरोधित्वादेकस्याप्युभयाभावप्रतियोगित्वादेकवति कथं तदभावो वर्तेत इति वाच्यम् । विरोधित्वं हि तस्य विरोधिज्ञानविषयत्वेन । नेतरथा, माना-भावात् । इत्थञ्च तज्ज्ञानस्य न प्रतियोगिज्ञानत्वेन विरोधित्वम् । प्रमेयत्वादिना तज्ज्ञानस्यापि विरोधित्वप्रसङ्गात् । किन्तु प्रतियोगितावच्छेद-कावच्छिन्नप्रतियोगिज्ञानत्वेन तथात्वं वाच्यम् । एवञ्च प्रतियोगितावच्छेद-कावच्छिन्नप्रतियोगिसत्वमेव तदभावविरोधीत्यायातम् ॥

किञ्च प्रतियोगिसत्वमात्रं नाभावविरोधि, संयोगसम्बन्धेन घटवति समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यासत्वप्रसङ्गात् । नापि तेन प्रति-योगिसत्वं तत्सम्बन्धावच्छिन्नाभावविरोधि, समवायसम्बन्धेन द्रव्यवति जलादौ पृथिवीवृत्तित्वविशिष्टद्रव्याभावासत्वप्रसङ्गात् । एवं संयोगसम्बन्धेन घटवति पूर्वक्षणविशिष्टतद्घटाभावसत्वेन तत्प्रतीतिव्यवहारयोस्सर्वानुभवसिद्धयोरपलाप-प्रसङ्गात् । तस्मात्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्वमभावविरोधीति सिद्धम् । एवमन्योन्याभावोऽपि बोध्यः ॥

केचित्तु घटपटोभयं न पट इति प्रतीतिबलाद्व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकाभावमपि कञ्चन स्वीकुर्वन्ति । सौन्दलोपाध्यायाः[1] पटवत्यपि घटत्वेन पटो नास्तीत्यनुभवात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावमपि कञ्चनाभ्युपगच्छन्ति ॥

अत्यन्ताभावस्य व्याप्यवृत्त्यव्याप्यवृत्तिभेदेन द्वैविध्यमपि बोध्यम् । तत्राव्याप्यवृत्तयः संयोगविभागशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाभावाः । तदन्ये व्याप्यवृत्तयः । प्रमाणं च तत्र प्रत्यक्षकार्यादिकमेव । पक्षिसंयोगवत्यपि 'शाखायां वृक्षः पक्षिसंयोगी न मूले' इत्यनुभवात् । अन्योन्याभावस्तु व्याप्यवृत्तिरिति सिद्धान्तः ॥

अत्र लीलावतीकृतः संयोगाभावो नाव्याप्यवृत्तिः संयोगस्य व्याप्यवृत्तित्वात् । प्रतियोगिनो व्याप्यवृत्तित्वे तदभावस्याव्याप्यवृत्तित्वासम्भवात् । स्वाभावसामानाधिकरण्यस्यैवाव्याप्यवृत्तित्वात् । निरुक्तप्रतीतिः मूले पक्षिसंयोगाभावमवगाहते न वृक्ष इति वदन्ति ॥

दीधितिकृतस्तु संयोगेन द्रव्यस्याव्याप्यवृत्तित्वात् तदभावोप्यव्याप्यवृत्तिः । 'इह पर्वते शिखरे हुताशनः न नितम्बे' इति प्रतीतेः । वृत्तेरप्यव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वस्यात्यन्तमसम्भावितत्वाच्च । एवं संयोगादिमदन्योन्याभावोऽपि अव्याप्यवृत्तिः । 'मूले वृक्षः पक्षिसंयोगवान्ने'त्यनुभवात् । न च 'शिखी ध्वस्त' इत्यादि प्रतीतेः "सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाधे" इति न्यायेन तत्र पुरुषस्य विद्यमानत्वेन शिखाध्वंसविषयत्ववत् निरुक्तप्रतीतेरपि संयोगाभावविषयत्वमेव कल्प्यत इति वाच्यम् । एवं सति अन्योन्याभावविलोपप्रसङ्गात् । 'घट-

1 B reads कोदण्डोपाध्यायाः ।

भिन्नः पट' इत्यादावपि घटत्वाद्यभावविषयत्वेनैव त्वदुक्तरीत्यैवोपपत्तेः । यदि घटादेरेव प्रतियोगित्वावगाहनादिति तदा तुल्यमिति प्राहुः ॥

नवीनास्तु समवायोप्यव्याप्यवृत्तिः । ततश्च तेन सम्बन्धेन द्रव्यस्याव्याप्यवृत्तित्वात्तेनसम्बन्धेन तदभावोप्यव्याप्यवृत्तिः । 'इह तन्तुषु पटसमवायो न दशायामिह तन्तुषु पटो न दशाया'मित्यनुभवादित्याहुः ॥

यज्ञपत्युपाध्यायास्तु, धर्मात्यन्ताभावो धर्म्यन्योन्याभावश्च एक एव तयोः समनियतत्वात् अविरोधित्वाल्लघुत्वाच्चेति वदन्ति ॥

दीधितिकृतस्तु, समनियतात्यन्ताभावानां सर्वेषामेवैक्यं वदन्ति । भेदे मानाभावात् । प्रागभावमपि नाभ्युपगच्छन्ति ॥

अत्र प्राभाकराः । अधिकरणातिरिक्ताभावसद्भावे मानाभावः । न च घटवति तदभावप्रत्ययप्रसङ्गः । अधिकरणविशेषस्यैव तथात्वाभ्युपगमात् ॥

ननु कोयं विशेषः ? न कैवल्यम् । तस्याप्यभावरूपत्वेनात्माश्रयात् । अन्यस्य दुर्वचत्वात् । नापि तदधिकरणव्यक्तिरूपमेव विशेषः । विचित्रेष्वनेकेष्वधिकरणेषु[1] 'घटो न, घटो नास्ती'त्येकाकारव्यवहारानुपपत्तेः । अनुगतधर्माभावे अनुगतव्यवहारानुपपत्तेरिति चेन्न । अभावत्वस्य कस्यचिद्धर्मस्य सर्वत्रानुगतस्य 'धर्मिकल्पनात[2]' इति न्यायेन स्वीकारात् । अभेदेप्याधाराधेयभावो रूपभेदेन[3] न विरुद्धः । अत एव घटवत्यपि घटापसरणदशायां घटाभावव्यवहारोप्युपपद्यते । तदव तत्र तदभावत्वस्य सत्वात् । तस्य च सप्रतियोगिकत्वेन न सप्रतियोगिकत्वानुपपत्तिरिति वर्णयन्ति ॥

1 A reads चित्रेषु अनन्तेषु ।

2 धर्मिकल्पनातः धर्मकल्पनं वरं इति न्यायः ।

3 भूतलत्वेनाधारता घटाभावत्वेन आधेयता ।

अत्रेदं चिन्त्यम् । सप्रतियोगिकः अनुगतश्च यो धर्मः स एवाभावः । न च तत्राभावत्वस्यापि कल्पने गौरवमिति वाच्यम् । तस्यातिरिक्तस्याकल्पनात् तदपि सम्बन्धभेदेन प्रतियोगितावच्छेदकमेवेति अनुपदमेव विवेचयिष्यते । तेन 'भूतले घट' इत्याधाराधेयभावोऽपि सम्मुख एव समीचीनः ॥

तार्किकंमन्यास्तु 'इह भूतले घटो नास्ती'ति प्रतीतिसिद्धाभावत्वस्यानन्ताधिकरणवृत्तित्वकल्पनापेक्षया एकमेवाभावं कल्पयित्वा तत्रैवाभावत्वस्य वृत्तिमत्वकल्पनायां च अभावकल्पना तस्यानेकाधिकरणवृत्तिकल्पना च फलमुखत्वान्न दोषायेत्याहुः ॥

ननु अभावत्वं न भावभिन्नत्वम् । तद्धि भावत्वावच्छिन्नप्रतियोगिताकभिन्नत्वम् । भावत्वञ्च द्रव्याद्यन्यतमत्वम् । तदपि द्रव्यभिन्नत्वे सति गुणभिन्नत्वे सति सामान्यभिन्नत्वे सति विशेषभिन्नत्वे सति समवायभिन्नो यः तद्भिन्नत्वम् । तथा चान्योन्याश्रयः । नापि 'द्रव्यगुणकर्मसामान्यविशेषसमवाया' इति समूहालम्बनधीविषयत्वं भावत्वम् । तदवच्छिन्नप्रतियोगिताकभिन्नत्वमभावत्वम् । तादृशबुद्ध्यज्ञानेपि अभावज्ञानात । भिन्नत्वस्यान्योन्याभावरूपत्वेन अन्योन्याभावत्वाज्ञाने तदज्ञानात् । अन्योन्याभावत्वस्य चाभावघटितत्वेनान्योन्याश्रयात् अभावत्वाघटितान्योन्याभावत्वस्य दुर्वचत्वात् । तस्मादभावत्वं दुर्वचमिति चेन्न ॥

अत्र ब्रूमः । सत्तावच्छिन्नप्रतियोगितानिरूपितमनुयोगित्वमभावत्वम । तदपि प्रतियोग्यनुयोगिभावनिरूपकस्वरूपसम्बन्धविशेषेण सत्वमेव । न च सामान्यादावतिप्रसङ्गः । तस्यापि तद्भिन्नत्वेन तेन सम्बन्धेन सत्वादावपि सत्वस्य सत्वादिति वाच्यम् । यत्र हि समवायसम्बन्धेन सत्वं न तत्र समवायसम्बन्धावच्छिन्नसत्वावच्छिन्नप्रतियोग्यनुयोगिभावसम्बन्धेन सत्तेति सर्वं सिद्धम् । एवञ्च सामान्यादावप्येकार्थसमवायसम्बन्धेन सत्वस्य सत्वात् ।

निरुक्तसम्बन्धेन तत्र सत्त्वस्य व्याप्यवृत्तित्वात्, एकार्थसमवायसम्बन्धेन वृत्तित्वे समवायसम्बन्धेन वृत्तित्वस्याप्रत्यूहत्वात्। अत एव समवायस्यापि स्वस्वरूपस्यैव सम्बन्धत्वात् तत्राप्येकार्थसमवायसम्बन्धेन सत्त्वस्य सत्त्वात् न समवायेऽप्यतिप्रसङ्गः। न चैवं स्वसमवायिविशेषणतासम्बन्धेनाभावेऽपि सत्त्वस्य वृत्तित्वेन प्रतियोग्यनुयोगिभावसम्बन्धेन उक्तयुक्त्या सत्त्वाभावादव्याप्तिरिति वाच्यम्। समवायातिरिक्तसम्बन्धावच्छिन्नस्वावच्छिन्नप्रतियोग्यनुयोगिभावसंबन्धेन तत्रान्यत्र चाभावसामान्य एव सत्ताया विद्यमानत्वात्, समवायातिरिक्तसम्बन्धानवच्छिन्नप्रतियोगितानिरूपितमनुयोगित्वमभावं इति लक्षणं निर्व्यूढम्। एतेन ध्वंसप्रागभावप्रतियोगिनि तयोस्सम्बन्धावच्छिन्नत्वे मानाभावात् तदुभयत्र निरुक्तलक्षणमव्याप्तमिति प्रत्युक्तम्। विशिष्टाभावघटितलक्षणस्य तत्राप्यप्रत्यूहत्वात्। सम्बन्धानवच्छिन्नत्वादेव समवायातिरिक्तसम्बन्धानवच्छिन्नत्वात्॥

वस्तुतस्तु समवायसम्बन्धेन घटवति समवायसम्बन्धावच्छिन्नतद्घटत्वावच्छिन्नप्रतियोगिताकाभावज्ञानानुदयस्येव तदानीं तद्घटप्रागभावध्वंसयोरपि ज्ञानानुदयस्य सर्वानुभवसिद्धत्वात्; तथा च प्रतिबध्यप्रतिबन्धकभावत्रयकल्पने गौरवात्। समवायसम्बन्धावच्छिन्नतद्घटत्वावच्छिन्नप्रतियोगिताकत्वं त्रयाणामपि स्वीकृत्य एकप्रतिबध्यप्रतिबन्धकभावकल्पनाया लाघवेनोचितत्वात् इति ५।

अत्यन्ताभावप्रतियोगितायास्सम्बन्धावच्छिन्नत्वे प्रतिबध्यप्रतिबन्धकभाव एव हि मानम्, अन्यथा संयोगेन घटवति समवायेन तदभावप्रत्ययाभावप्रसङ्गात्। एवमन्योन्याभावप्रतियोगिताया अपि बोध्यम्। इत्थञ्च यथा घटत्वादेः प्रतियोगितावच्छेदकत्वं तथा संयोगादिसम्बन्धविशेषस्यापि मन्तव्यम्। इयांस्तु विशेषः। घटत्वादेः प्रकारतया संयोगादेस्तु संसर्गतयेति॥

एतेन प्रतियोगितावच्छेदकभेद एव अभावभेदनियामकः । न प्रतियोगिभेदः । तथा सति एकघटप्रतियोगिकानां चतुर्णामप्यभेदप्रसङ्गात् । तत्र प्रतियोगितावच्छेदकभेदस्तु विद्यत एव । अत्यन्ताभावे तद्धटत्वस्यान्योन्याभावे तादात्म्यस्य प्रागभावे उत्तरकालस्य ध्वंसे पूर्वकालस्यावच्छेदकस्य भेदसत्त्वादिति प्राचीनमते संयोगेन घटाभावस्य समवायेन घटाभावस्य च भेदो न स्यात् । उभयत्र घटत्वस्यैकस्यैव प्रतियोगित्वावच्छेदकत्वादित्यादि नवीनोक्तदूषणाभासा न भासन्ते । तत्रापि संसर्गविधयावच्छेदकभेदस्य जागरूकत्वात् । यावदवच्छेदकभेदस्य तथात्वे च घटान्योन्याभावात्यन्ताभावयोरपि भेदो न स्यात् गौरवाच्चेति सर्वं शिवम् ॥

एवं तादात्म्यातिरिक्तसंसर्गावच्छिन्नप्रतियोगिताकाभावत्वं संसर्गाभावत्वम् । अन्योन्याभावेऽतिव्याप्तिप्रत्याख्यानायातिरिक्तान्तम् । न च संयोग्यन्योन्याभावेतिव्याप्तिः । तस्य तादात्म्यातिरिक्तसंयोगावच्छिन्नप्रतियोगिताकत्वात् तस्य संसर्गत्वाच्चेति वाच्यम् । संयोगितादात्म्यस्य संयोगरूपत्वेन तद्भिन्नत्वाभावात्[1] तादात्म्यस्याभेदरूपत्वादभेदस्य भेदाभावत्वादन्योन्याभावाभावस्य च प्रतियोगितावच्छेदकरूपत्वात् । तादात्म्यस्य प्रतियोगिमात्रवृत्त्यसाधारणधर्मरूपत्वेपि प्रकृते संयोगस्य तादृशत्वात् ॥

वस्तुतस्तादृशसंसर्गावच्छिन्नत्वं च संसर्गविधया तदवच्छिन्नत्वमिह निवेशितमिति न कोऽपि दोष इति ॥

1 ततश्च तादात्म्यातिरिक्तत्वं संयोगस्य नेति नातिव्याप्तिः ।

एवमन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । न च संयोग्यत्यन्ताभावेतिव्याप्तिः । तत्र संयोगस्य सम्बन्धविधयानवच्छेदकत्वात् । प्रतियोग्यवृत्तिसदातनाभावत्वं वा । न च घटपटोभयं न घट इति प्रतीतिसिद्धव्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकान्योन्याभावे अव्याप्तिरिति वाच्यम् । तादृशाभावानभ्युपगमात् । तादृशप्रतीतेश्च घटे घटपटोभयत्वावच्छिन्न[1]प्रतियोगिताकभेदविषयत्वात् । तर्हि तत्रैवाव्याप्तिरिति चेन्न, तत्रात्यन्ताभावत्वेनैव लक्षणाकल्पनात्, तादृशप्रत्यक्षस्यापि अत्यन्ताभावविषयत्वात् । सदातनशब्देन प्रागभावध्वंसयोर्व्यवच्छेदः । न च तथापि नित्यत्वात्यन्ताभावेतिव्याप्तिः । तस्यापि नित्यत्वेन तस्य तदवृत्तित्वादिति वाच्यम् । तस्य भावपदार्थत्वेन अभावत्वाभावेन विशेष्येनैव तद्वारणात् । नित्यत्वं हि ध्वंसाप्रतियोगित्वम् । तदभावश्च ध्वंसप्रतियोगित्वमिति । तेन प्रतियोगिवृत्त्यभावत्वमत्यन्ताभावत्वमित्यन्ताभावलक्षणमपि तत्र नाव्याप्तम् । तस्य भावरूपत्वेनालक्ष्यत्वात् ॥

एतेन निर्वक्तुमशक्यत्वात भेदपदार्थ एवालीक इति नृसिंहाश्रमपरिश्रमः केवलं श्रम एवेत्याश्रयणीय एव । एवं सदातनसंसर्गाभावत्वमत्यन्ताभावत्वं उत्पत्तिमदभावत्वं ध्वंसत्वं विनाश्यभावत्वं प्रागभावत्वमिति लक्षणान्यवसेयानि । न च कृतप्रायश्चित्तस्याविहितकर्मानाचरणविहितकर्माचरणयुक्तस्य दुःखप्रागभावे अव्याप्तिः । तस्य दुःखानुत्पादेन प्रागभावस्य नित्यत्वादिति वाच्यम् । तत्र दुःखासम्भवेन प्रागभावे मानाभावात् । प्रायश्चित्तादेश्च अधर्मनाशकत्वात् ॥

[1] A reads भयावच्छिन्नः ।

न च घटवति घटात्यन्ताभावप्रतीतेः ततो नीते च घटे तत्र घटाभावप्रतीतेः पुनश्च तत्रानीते घटे तदभावाप्रतीतेश्च उत्पत्तिविनाशशालिनं कञ्चनात्यन्ताभावं स्वीकुर्वन्ति वेदान्तिनः । तथा च तत्र प्रागभावलक्षणं ध्वंसलक्षणञ्चातिव्याप्तमिति वाच्यम् । तादृशात्यन्ताभावसद्भावे मानाभावात् । उक्तप्रतीतीनां च समयभेदेन क्लृप्ताभावस्यैव सम्बन्धतदभावाभ्यामेवोपपत्तेः । अन्यथा तथाविधानां तादृशात्यन्ताभावानां तत्सम्बन्धानाञ्च तदुत्पत्तिविनाशानां तत्कार्यकारणभावानां तत्प्रतियोगिकतदनुयोगिकभेदानाञ्च कल्पने बहुतरगौरवप्रसङ्गात् ॥

एवं गन्धानाधारसमयानाधाराभावत्वं प्रागभावत्वं ; पीतानाधारसमयानाधाराभावत्वं, चित्रानाधारसमयानाधाराभावत्वं, तिक्तानाधारसमयानाधाराभावत्वं, ज्ञानेच्छाकृतिभिन्नविभुविशेषगुणानादायापि लक्षणानि तत्र तत्र ज्ञेयानि । एवं स्वकालीनकालिकयावत्परत्वाश्रयावधिकापरत्वसमानकालीनाभावत्वं प्रागभावत्वम् । न च प्रलयरूपध्वंसेऽतिव्याप्तिः । प्रलयसमानकालीनकालिकपरत्वाप्रसिद्धेः । नापि प्रलयप्रागभावेऽव्याप्तिः, तत्समानकालीनः यावत्—परत्वाश्रयावधिकापरत्वाप्रसिद्धेरिति वाच्यम् । तस्यादृष्टरूपत्वाभावत्वेनालक्ष्यत्वात् । अदृष्टविशेषध्वंसस्यैव प्रलयत्वात् । प्रागभावादीनामनादित्वेन स्वसमानाधिकरणकालिकयत्किञ्चित्परत्वाश्रयावधिकापरत्वसमानकालीनत्वात् । सर्वेषां प्रागभावानामसंभवनिवारणाय यावदिति । तथाविधदैशिकपरत्वाश्रयावधिकापरत्वसमानकालीनत्वात् सर्वेषां तेषामसंभवनिरासाय कालिकेति सर्वमवदातमिति संक्षेपः ॥

स्पन्दः समानं सामान्यं विशेषस्समवायकः ।
अभावस्सप्रपञ्चश्च निरणायि निरङ्कुशम् ॥

उपसंहारः

नत्वा लक्ष्मीनृसिंहं शशिनिभवपुषं देवदेवं त्रिणेत्रम्
कृत्वा नानाविधानां बहुकृतिनिचयं कल्पनानां शुभानाम् ।
दृष्ट्वा कर्णाटगौडद्रमिडमगधजान् मैथिलान् पण्डितार्यान्
सृष्ट्वा श्रीतत्त्वतर्कं भुवि कथककविः काश्यपः श्रीनिवासः ॥

इति श्रीनिवासाचार्यविरचितं
न्यायसिद्धान्ततत्त्वामृतं समाप्तम्

PRINTED AT THE INDIA PRINTING WORKS, MYLAPORE MADRAS.